सिंहसूरर्षिविरचितः

लोकविभागः

[प्रथमो विभागः]

लोकालोकविभागज्ञान् भक्त्या स्तुत्वा जिनेश्वरान् । व्याख्यास्यामि समासेन लोकतत्त्वमनेकधा ॥ १
क्षेत्रं कालस्तथा तीर्थं प्रमाणपुरुषैः सह । चरितं च महत्तेषां पुराणं पञ्चधा विदुः ॥ २
समन्ततोऽप्यनन्तस्य खियतो मध्यमाश्रितः । त्रिविभागस्थितो लोकस्तिर्यग्लोकोऽस्य[1] मध्यगः ॥ ३
जम्बूद्वीपोऽस्य मध्यस्थो मन्दरस्तस्य मध्यगः । तस्माद्विभागो लोकस्य तिर्यगूर्ध्वोऽधरस्तथा ॥ ४
तिर्यग्लोकस्य बाहल्यं मेर्वायामसमं स्मृतम् । तस्मादूर्ध्वो[2] भवेदूर्ध्वो ह्यधस्ताव[ब]धरो[3]ऽपि च ॥ ५
झल्लरीसदृशो मध्यो वेत्रासनसमोऽधरः । ऊर्ध्वो मृदङ्गसंस्थान इति लोकोऽर्हतोदितः ॥ ६
योजनानां शतं पूर्णं सहस्रगुणितं च तत् । जम्बूद्वीपस्य विस्तारो दृष्टः केवलदृष्टिभिः ॥ ७
१००००० ।

लोक और अलोकके विभागको जाननेवाले तीर्थंकरोंकी भक्तिपूर्वक स्तुति करके यहां मैं संक्षेपमें अनेक प्रकारके लोकतत्त्वका व्याख्यान कहूंगा ॥१॥ क्षेत्र, काल, तीर्थ तथा प्रमाणपुरुषोंके साथ उनका महान् चरित्र भी; इस प्रकार पुराण पांच प्रकारका जानना चाहिये ॥ २ ॥ यह लोक जिसका कि चारों ओर अन्त नहीं है ऐसे अनन्त आकाशके मध्यमें स्थित है । इसके तीन विभाग हैं— ऊर्ध्वलोक, अधोलोक और तिर्यग्लोक (मध्यलोक)। इनमें तिर्यग्लोक इसके मध्यमें स्थित है ॥ ३ ॥ इसके मध्यमें जम्बूद्वीप स्थित है और उसके भी मध्यमें मंदर पर्वत (मेरु) स्थित है । उसीसे लोकके ये तीन विभाग हैं— तिर्यक्, ऊर्ध्व और अधर ॥ ४ ॥ इनमें तिर्यग्लोकका बाहल्य (मुटाई) मेरुकी उंचाई (१००००० यो.) के बराबर माना गया है । उक्त मेरुके ऊपर ऊर्ध्वलोक और उसके नीचे अधरलोक स्थित है ॥ ५ ॥ मध्यलोक झालरके सदृश, अधरलोक वेत्रासनके समान, तथा ऊर्ध्वलोक मृदंग जैसा है । इस प्रकारका यह लोकका आकार अरिहन्त भगवान्‌के द्वारा कहा गया है ॥ ६ ॥ केवलियोंके द्वारा जम्बूद्वीपका विस्तार सहस्रसे गुणित पूर्ण सौ योजन अर्थात् एक लाख (१०००००) योजन प्रमाण देखा गया है ॥ ७ ॥ उसकी परिधिका

---

१ प लोकस्य । २ ब 'ऊर्धो । ३ ब 'धरो ।

लक्षस्थानात् क्रमाद् ग्राह्यः सप्त द्वे द्वे षडेककम् । त्रीणि चास्य परिक्षेपो योजनानां प्रमाणतः ॥ ८
तिस्रो गव्यूतयश्चान्या अष्टाविंशधनुःशतम् । त्रयोदशाङ्गुलानि स्युः साधिकं चार्धमङ्गुलम् ॥ ९
यो ३१६२२७ को ३ ध[1] १२८ अं १३ सा ½ ।
भारतं दक्षिणे वर्षं [वै] तत्र हैमवतं परम् । हरिवर्षविदेहाश्च रम्यकं च हिरण्यवत् ॥ १०
ऐरावतं च द्वीपान्ते इति वर्षाणि नामतः । भवेयुरत्र सप्तैव षड्वास्यधरपर्वताः ॥ ११
हिमवानादितः शैलः परतश्च महाहिमः । निषधश्च ततो नीलो रुक्मी च शिखरी च ते ॥ १२
हेमार्जुनमयौ शैलौ तपनीयमयोऽपरः । वैडूर्यो रजतश्चान्यः सौवर्णश्च[2] क्रमात् स्थिताः ॥ १३
षड्विंशतिशतानि स्युः पञ्च योजनसंख्यया । एकान्नविंशतेर्भागाः षट् च दक्षिणपार्श्वयम् ॥ १४
यो ५२६ भा ६/१९ ।
वर्षात्तु द्विगुणः शैलः शैलाद्वर्षं च तत्परम् । इत्या विदेहतो विद्यात्ततो हानिश्च तत्समा ॥ १५
जम्बूद्वीपस्य भागः स्याच्छतत्यात्र शतस्य यः । भारतं तं विदुः प्राज्ञाः संख्यानज्ञानपारगाः[3] ॥ १६

प्रमाण अंकक्रमसे सात, दो, दो, छह, एक और तीन (३१६२२७) अर्थात् तीन लाख सोलह हजार दो सौ सत्ताईस योजन, तीन गव्यूति (कोस), एक सौ अट्ठाईस धनुष और साधिक साढे तेरह अंगुल मात्र है- यो. ३१६२२७ को. ३ ध. १२८ अं. १३½ ॥ ८-९ ॥ उक्त जम्बूद्वीपके भीतर दक्षिणकी ओर भारतवर्ष है । उसके आगे हैमवत, हरिवर्ष, विदेह, रम्यक, हिरण्यवत् और द्वीपके अन्तमें ऐरावत; इस प्रकार इन नामोंसे संयुक्त सात क्षेत्र तथा ये छह वर्षधर पर्वत हैं- आदिमें हिमवान् शैल, फिर महाहिमवान्, निषध, नील, रुक्मी और शिखरी ॥१०-१२॥ वे पर्वत क्रमसे सुवर्ण, चांदी, तपनीय, वैडूर्य, रजत और सुवर्ण स्वरूपसे स्थित हैं ॥१३॥ दक्षिण पार्श्वभागमें स्थित भरतक्षेत्रका विस्तार पांच सौ छब्बीस योजन और एक योजनके उन्नीस भागोंमेंसे छह भाग प्रमाण है - ५२६$\frac{६}{१९}$ यो. ॥१४॥ क्षेत्रसे दूना पर्वत और फिर उससे दूना आगेका क्षेत्र है । यह क्रम विदेह क्षेत्र पर्यंत जानना चाहिये । आगे इसी क्रमसे उनके विस्तारमें हानि होती गई है ॥ १५ ॥ यहां जम्बूद्वीपका जो एक सौ नब्बेवां भाग है उसे संख्याज्ञानके पारगामी विद्वान् भारत वर्ष मानते हैं ॥ विशेषार्थ- जम्बूद्वीपका विस्तार एक लाख (१०००००) योजन प्रमाण है। उसके उपर्युक्त क्रमसे ये १९० विभाग हुए हैं- १ भरत + २ हिमवान् + ४ हैमवत + ८ महाहिमवान् + १६ हरिवर्ष + ३२ निषध + ६४ विदेह + ३२ नील + १६ रम्यक + ८ रुक्मी + ४ हैरण्यवत + २ शिखरी और + १ ऐरावत=१९० । इसीलिये जम्बूद्वीपके विस्तारमें १९० का भाग देकर लब्धको अभीष्ट क्षेत्र अथवा पर्वतके वि भागोंसे गुणित करनेपर उसके विस्तारका प्रमाण ज्ञात हो जाता है। जैसे - $\frac{१००००० \times ३२}{१९०}$ = १६८४२$\frac{२}{१९}$ यो. निषध व नील पर्वतका विस्तार ॥१६॥

---

१ ब दं । २ प ब सौवरादिच । ३ प संख्याज्ञानपारगाः ।

पूर्वापरायतः शैलो भरतस्य तु मध्यगः । अन्ताभ्यां सागरं[1] प्राप्तो विजयार्धो हि नामतः ॥ १७
पञ्चविंशतिविस्तृष्टः[2] २५ स्तच्चतुर्थमधोगतः ६¼ । पञ्चाशतं च विस्तीर्णस्त्रिश्रेणी रजतात्मकः ॥ १८
योजनानि दशोत्सृत्य भूम्या दश च विस्तृते । श्रेण्यौ विद्याधराणां ते पर्वतायामसंमिते ॥ १९
पञ्चाशदुत्तरश्रेण्यां षष्टिरुत्तरतः पुरः । तासां नामानि वक्ष्यामि शास्त्रोद्दिष्टविधिक्रमात् ॥ २०
किन्नामितं प्रथमाख्यं ततः किन्नरगीतकम्[3] । तृतीयं नरगीताख्यं[4] चतुर्थं बहुकेतुकम् ॥ २१
पञ्चमं पुण्डरीकं च सिंहध्वजमतः परम् । श्वेतध्वजं च विज्ञेयं गरुडध्वजमष्टमम् ॥ २२
श्रीप्रभं श्रीधरं चैव लोहार्गलमरिंजयम् । वज्रार्गलं च वज्राढ्यं विमोची तु पुरंजयम् ॥ २३
शकटाभिमुखी प्रोक्ता तथा चैव चतुर्मुखी । बहुमुख्यरजस्का च विरजस्का रथनूपुरम् ॥ २४
मेखलापुरं चैव क्षेमचर्यपराजितम् । कामपुष्पं च विज्ञेयं गगनादिचरी तथा ॥ २५
विनयादिचरी ज्ञात्वा त्रिंशं शुक्रपुरं स्मृतम् । संजयन्ती जयन्ती च विजया वैजयन्तिका ॥ २६
क्षेमंकरं च चन्द्राभं सूर्याभं च पुरोत्तमम् । चित्रकूटं महाकूटं हेमकूटं त्रिकूटकम् ॥ २७
मेघकूटं विचित्राख्यकूटं वैश्रवणादिकम् । सूर्यादिकपुरं चैव तथा चन्द्रपुरं स्मृतम् ॥ २८
स्यान्नित्योद्योतिनी ज्ञात्वा विमुखी नित्यवाहिनी । एता वै दक्षिणश्रेण्यां पुरी च सुमुखी तथा ॥ २९
प्राकारगोपुरोत्तुङ्गाः सर्वरत्नमयोज्ज्वलाः । राजधान्योऽत्र विज्ञेयाः प्रोक्ता सर्वज्ञपुङ्गवैः ॥ ३०

विजयार्ध नामक पर्वत भरत क्षेत्रके मध्यमें स्थित है। यह पर्वत पूर्व-पश्चिममें लंबायमान होकर अपने दोनों ओरके अन्तिम भागोंके द्वारा समुद्रको प्राप्त हुआ है ॥१७॥ उपर्युक्त रजतमय पर्वत पच्चीस (२५) योजन ऊंचा, इसके चतुर्थ भाग (६¼ यो.) मात्र अवगाहसे सयुक्त और पचास (५०) योजन विस्तीर्ण होता हुआ तीन श्रेणियोंसे सहित है ॥१८॥ भूमिसे दस योजन ऊपर जाकर इस पर्वतपर दस योजन विस्तीर्ण दो विद्याधरश्रेणियां हैं। इनकी लंबाई पर्वतकी लंबाईके बराबर है ॥१९॥ इन श्रेणियोंमेंसे दक्षिण श्रेणिमें पचास और उत्तर श्रेणिमें साठ नगर हैं। उनके नामोंको शास्त्रोक्त विधिके क्रमसे कहते हैं– १ किन्नामित २ किन्नरगीत ३ तृतीय नरगीत ४ चतुर्थ बहुकेतुक ५ पांचवां पुण्डरीक ६ सिंहध्वज ७ श्वेतध्वज ८ गरुडध्वज ९ श्रीप्रभ १० श्रीधर ११ लोहार्गल १२ अरिंजय १३ वज्रार्गल १४ वज्राढ्य १५ विमोची १६ पुरंजय (जयपुर) १७ शकटमुखी १८ चतुर्मुखी १९ बहुमुखी २० अरजस्का २१ विरजस्का २२ रथनूपुर २३ मेखलापुर २४ क्षेमचरी (क्षेमपुरी) २५ अपराजित २६ कामपुष्प २७ गगनचरी २८ विनयचरी २९ तीसवां (?) शुक्रपुर ३० संजयन्ती ३१ जयन्ती ३२ विजया ३३ वैजयन्ती ३४ क्षेमंकर ३५ चन्द्राभ ३६ सूर्याभ ३७ पुरोत्तम ३८ चित्रकूट ३९ महाकूट ४० हेमकूट ४१ त्रिकूट ४२ मेघकूट ४३ विचित्रकूट ४४ वैश्रवणकूट ४५ सूर्यपुर ४६ चन्द्रपुर ४७ नित्योद्योतिनी ४८ विमुखी ४९ नित्यवाहिनी और ५० सुमुखी, ये पचास नगरियां दक्षिण श्रेणिमें हैं। प्राकार और गोपुरोंसे उन्नत, सर्वरत्नमय एवं उज्ज्वल इन नगरियोंको यहां राजधानी जानना चाहिये; ऐसा

१ आ प सगंर । २ आ प °मुद्विद् । ३ आ प °नीतकम् । ४ आ प °नीताख्यं ।

अर्जुनाख्यापरी चैव कैलासं वारुणी तथा । विद्युत्प्रभं किलिंकिलं चूडामणिशशिप्रभम् ॥ ३१
वंशालं[1] पुष्पचूलं च हंसगर्भं बलाहकम् । शिवंकरं च श्रीसौधं चमरं शिवमन्दिरम् ॥ ३२
वसुमत्का वसुमती सिद्धार्थकमतः परम् । शत्रुंजयं केतुमालमेकविंशं ततः परम् ॥ ३३
सुरेन्द्रकान्तमपरं तथा गगननन्दनम् । अशोका च विशोका च वीतशोका तथा स्मृता ॥ ३४
अलका तिलका चैव तिलकं चाम्बरादिकम् । मन्दरं कुमुदं कुन्दं तथा गगनवल्लभम् ॥ ३५
दिव्यादितिलकं चान्यद् भूम्यादितिलकं तथा । गन्धर्वादिपुरं चान्यन्मुक्ताहारं च नैमिषम् ॥ ३६
अग्निज्वालं महाज्वालं श्रीनिकेतं जयावहम् । श्रीवासं मणिवज्राख्य भद्राश्वं च धनंजयम् ॥ ३७
गोक्षीरफेनमक्षोभ्यं गिर्यादिशिखरं तथा । धरणी धारिणी[2] दुर्गं दुर्द्ध[र्ष]रं च सुदर्शनम् ॥ ३८
महेन्द्रादिपुरं चैव विजयादिपुरं तथा । सुगन्धिनी पुरी चान्या वज्रार्धतरसंज्ञकम् ॥ ३९
रत्नाकरं च विज्ञेयं तथा रत्नपुरं वरम् । इत्येतान्युत्तरश्रेण्यां षष्टिरत्र पुराणि तु ॥ ४०
दशैव पुनरुत्सृत्य चाभियोग्यपुराणि च । नानामणिमयान्यत्र प्रासादभवनानि च ॥ ४१
ततः पञ्चोर्ध्वमुत्सृत्य शिखरं दशविस्तृतम् । पूर्णभद्रेति सा श्रेणी गिरिनामसुरोऽत्र च ॥ ४२
सिद्धायतनकूटं च दक्षिणार्धकमेव च । खण्डकादिप्रपातं च पूर्णभद्रं ततः परम् ॥ ४३
विजयार्धकुमारं च मणिभद्रमतः परम् । तामिस्रगुहकं चैवमुत्तरार्धं च भारतम् ॥ ४४

सर्वज्ञ देवों द्वारा कहा गया है ॥ २०–३० ॥ १ अर्जुना २ अरुणी ३ कैलास ४ वारुणी ५ विद्युत्प्रभ ६ किलकिल ७ चूडामणि ८ शशिप्रभ ९ वंशाल १० पुष्पचूल ११ हंसगर्भ १२ बलाहक १३ शिवंकर १४ श्रीसौध १५ चमर १६ शिवमंदिर १७ वसुमत्का १८ वसुमती १९ सिद्धार्थपुर २० शत्रुंजय २१ इक्कीसवां केतुमाल २२ सुरेन्द्रकान्त २३ गगननन्दन २४ अशोका २५ विशोका २६ वीतशोका २७ अलका २८ तिलका २९ अम्बरतिलक ३० मंदर ३१ कुमुद ३२ कुन्द ३३ गगनवल्लभ ३४ दिव्यतिलक ३५ भूमितिलक ३६ गन्धर्वपुर ३७ मुक्ताहार ३८ नैमिष ३९ अग्निज्वाल ४० महाज्वाल ४१ श्रीनिकेत ४२ जयावह ४३ श्रीवास ४४ मणिवज्र ४५ भद्राश्व ४६ धनंजय ४७ गोक्षीरफेन ४८ अक्षोभ्य ४९ गिरिशिखर ५० धरणी ५१ धारिणी ५२ दुर्ग ५३ दुर्धर ५४ सुदर्शन ५५ महेन्द्रपुर ५६ विजयपुर ५७ सुगन्धिनी ५८ वज्रार्धतर ५९ रत्नाकर और ६० रत्नपुर, इस प्रकार ये साठ नगर यहां उत्तर श्रेणिमें है ॥ ३१–४० ॥ इसके आगे दस ही योजन और ऊपर जाकर आभियोग्यपुर हैं। यहां नाना मणियोंसे निर्मित प्रासाद-भवन हैं ॥ ४१ ॥ उसके ऊपर पांच योजन और जाकर दस योजन विस्तृत शिखर है। वह पूर्णभद्रा नामकी श्रेणि है। यहांपर पर्वतके समान नामवाला (विजयार्ध) देव रहता है ॥ ४२ ॥ सिद्धायतन कूट, दक्षिणार्धभरत कूट, खण्डप्रपात, पूर्णभद्र, विजयार्धकुमार, मणिभद्र, तामिस्रगुहा, उत्तरार्धभरत और अन्तिम वैश्रवण; ये विजयार्धके ऊपर नौ कूट स्थित हैं। इनकी

---

१ प वैशालं। २ ब दारिणी।

अन्यत्र वैमानिकावासं च सप्तकेषां षट्कमुच्छ्रितिः। भान्यूनपदानि सर्वाणि व्यन्तरक्रीडनानि च ॥ ४५

यो ६ को. १ ।

गव्यूतिभागवृत्तुङ्गं पूर्वं कूटमिहायतम् । चैत्यं तत्सार्धविस्तीर्णं कूटे पू[पू]र्वमुखं स्थितम् ॥ ४६

द्वे शते त्रिंशदष्टौ च कलास्तिस्रश्च पार्श्वगम् । दक्षिणार्धस्य विष्केभमुत्तराऽर्धेऽपि तत्समः ॥ ४७

यो २३८ । ३/९ ।

शतानां सप्तनवतिः साधिका षड्भिरष्टकैः । कलाश्च द्वादशैवोक्ता ज्यार्धस्य भरतस्य वा[1] ॥४८

यो ९७४८ । ११/१९ ।

इषुणा हीनविष्कम्भाच्चतुर्भिर्गुणितात् पुनः । बाणेन गुणितान्मूलं जीवा स्यादिति भाषिता ॥ ४९

षड्गुणितादिषुवर्गाज्जीवावर्गेण संयुतात् । मूलं चापं भवेदेवं भाषितं मुनिपुङ्गवैः ॥ ५०

ऊंचाई एक कोस सहित छह ($६\frac{1}{4}$) योजन प्रमाण है। ये सब सुवर्णमय कूट व्यन्तर देवोंके क्रीडास्थान हैं ॥ ४३–४५ ॥ [सिद्धायतन] कूटके ऊपर पाद कम एक ($\frac{3}{4}$) कोस ऊंचा, पूरा एक कोस आयत और उसका आधा विस्तीर्ण ऐसा पूर्वाभिमुख चैत्यालय स्थित है ॥ ४६ ॥ दक्षिण भरतार्धका विस्तार दो सौ अड़तीस योजन और तीन कला ($२३८\frac{3}{19}$) प्रमाण जानना चाहिये। उत्तर भरतार्धका भी विस्तार उसीके बराबर है ॥ विशेषार्थ– भरत क्षेत्रका विस्तार $५२६\frac{6}{19}$ योजन है। इसके ठीक बीचमें ५० योजन विस्तृत विजयार्ध पर्वत स्थित है। अत एव भरत क्षेत्रके दो विभाग हो गये है। समस्त भरत क्षेत्रके विस्तारमेंसे विजयार्धके विस्तारको कम करके शेषको आधा कर देनेपर दक्षिण व उत्तर भरतार्धका विस्तार होता है। यथा– $५२६\frac{6}{19} - ५० \div २ = २३८\frac{3}{19}$ ॥ ४७ ॥ छह अष्टकों ($६ \times ८ = ४८$) से अधिक सत्तानबे सौ योजन और बारह कला प्रमाण ($९७४८\frac{12}{19}$ यो.) अर्ध भरतकी जीवा कही गई है ॥४८॥ बाणसे रहित विस्तारको चारसे गुणित करे, पश्चात् उसे बाणसे गुणित करनेपर जो प्राप्त हो उसका वर्गमूल निकाले। इस प्रक्रियासे जीवाका प्रमाण प्राप्त होता है, ऐसा परमागममें कहा गया है ॥ उदाहरण– दक्षिण भरतका बाण $\frac{४५२५}{19}$; वृत्तविस्तार– $\frac{१९०००००}{19}$;

$\left(\frac{१९०००००}{19} - \frac{४५२५}{19}\right) \times \left(\frac{४५२५}{19} \times ४\right) = \frac{३४३०८०९७५००}{३६१}$;

$\sqrt{\frac{३४३०८०९७५००}{३६१}} = \frac{१८५२१४}{19} = ९७४८\frac{12}{19}$ दक्षिण भरतकी जीवा ॥४९॥ बाणके वर्गको छहसे गुणित करके प्राप्त राशिमें जीवाके वर्गको मिला देनेपर उसका जो वर्गमूल होगा उतना धनुषका प्रमाण होता है, ऐसा मुनियोंमें श्रेष्ठ गणधर आदिकोंके द्वारा निर्दिष्ट किया गया है ॥

---

१ ब या ।

शतानि सप्त षट्षष्ट्या सहस्राणि नवापि च । कला च साधिकैका स्याद्धनुरस्यार्धकस्य तत् ॥ ५१

यो ९७६६ । $\frac{1}{19}$ ।

शतानि सप्त विंशत्या सहस्रं च दशाहतम् । एकादश कलाश्चेषा विजयार्धोत्तरस्थिता[1] ॥ ५२

१०७२० । $\frac{11}{19}$ ।

अयुतं सप्तशत्या च त्रिचत्वारिंशदग्रया । कलाः पञ्चदशापीति धनुःपृष्ठमिहोदितम् ॥ ५३

१०७४३ । $\frac{15}{19}$ ।

चतुर्दश सहस्राणि सप्तत्यग्रं चतुःशतम् । सैकं कलाश्च पञ्चैव भरतज्या निवेशिता ॥ ५४

यो १४४७१ । $\frac{5}{19}$ ।

चतुर्दश सहस्राणि तथा पञ्चगुणं शतम् । अष्टाविंशतिसंयुक्तमेकादश कला धनुः ॥ ५५

यो १४५२८ । $\frac{11}{19}$ ।

उच्छ्रितो योजनशतं क्षुल्लको हिमवान् गिरिः । महांश्च हिमवांस्तस्माद् द्विगुणो निषधस्ततः ॥ ५६

विंशतिश्च चतुष्कं च सहस्राणां शतानि च । नव द्वात्रिंशदग्राणि कलोना ज्या हिमाह्वके ॥ ५७

यो २४९३२ । $\frac{15}{19}$ ।

उदाहरण– दक्षिण भरतका बाण $\frac{4525}{19}$ यो.; उसका वर्ग $\frac{20470625}{361}$; उसकी जीवाका वर्ग $\frac{3431080976250}{361}$, $\sqrt{\frac{3431080976250}{361}} + \left(\frac{4525}{19}^2 \times 6\right) = \frac{185555555}{19}$ = ९७६६$\frac{1}{19}$ यो. दक्षिण भरतार्धका धनुष । इसको ग्रन्थकार आगेके श्लोक द्वारा स्वयं निर्दिष्ट करते हैं ॥५०॥ दक्षिण भरतार्धके धनुषका प्रमाण नौ हजार सात सौ छयासठ योजन और साधिक एक कला (९७६६$\frac{1}{19}$) मात्र है ॥ ५१ ॥ विजयार्धके उत्तरमें जीवाका प्रमाण दशगुणित सहस्र अर्थात् दस हजार सात सौ बीस योजन और ग्यारह कला (१०७२०$\frac{11}{19}$) मात्र है ॥ ५२ ॥ उसका धनुषपृष्ठ यहां दस हजार सात सौ तेतालीस योजन और पन्द्रह कला (१०७४३$\frac{15}{19}$) मात्र कहा गया है ॥ ५३ ॥ भरत क्षेत्रकी जीवा चौदह हजार चार सौ इकहत्तर योजन और पांच कला (१४४७१$\frac{5}{19}$) प्रमाण निर्दिष्ट की गई है ॥५४॥ उसका (उत्तर भरतका) धनुष चौदह हजार पांच सौ अट्ठाईस योजन और ग्यारह कला (१४५२८$\frac{11}{19}$) मात्र है ॥ ५५ ॥ क्षुद्र हिमवान् पर्वत एक सौ (१००) योजन ऊंचा है । उससे दूना (२०० यो.) महाहिमवान् और उससे भी दूना (४०० यो.) ऊंचा निषध पर्वत है ॥ ५६ ॥ हिमवान् पर्वतकी जीवा बीस और चार अर्थात् चौबीस हजार नौ सौ बत्तीस योजनमें एक कलासे रहित (२४९३१$\frac{15}{19}$) है [इसका प्रमाण त्रिलोकसारकी माधवचन्द्र त्रैविद्य विरचित टीकामें

---

१ ब श्रिताः ।

पञ्चवर्गः सहस्राणां द्वे शते त्रिंशदेव च । चतस्रश्च कला वेद्या हिमवच्चापविष्कंभे ॥ ५८

यो २५२३० । $\frac{४}{६}$ ।

सिद्धायतनकूटं च हिमवद्भरतादिके । इला गङ्गा श्रिया चैव रोहितास्याख्यमेव च ॥ ५९

सिन्धोरपि सुरादेव्या तत्र हैमवतं परम् । कूटं वैश्रवणस्यापि रत्नान्येतानि जातितः ॥ ६०

पञ्चविंशतिमुद्विद्धं मूले तत्सममेव विस्तृतम् । चतुर्भागोनकं मध्ये अग्रे द्वादश सार्धकम् ॥ ६१

१८ । $\frac{३}{४}$ । १२ । $\frac{१}{२}$ ।

सप्तत्रिंशत्सहस्राणि षट्शतानि[1] च सप्ततिः । चतुष्कं षोडश कला ज्योना हैमवतास्त्रिमा ॥ ६२

यो ३७६७४ । $\frac{१५}{१६}$ ।

अष्टत्रिंशत्सहस्राणि सप्तचत्वारिंशदेव च शतैः सह । चत्वारिंशच्च तच्चापं कला दश च साधिकाः ॥ ६३

यो ३८७४० । $\frac{१०}{१९}$ ।

त्रिपञ्चाशत्सहस्राणि एकत्रिंशान्यतो नव । शतानि च कलाः षट् च ज्या महाहिमवद्गिरेः ॥ ६४

यो ५३९३१ । $\frac{६}{१९}$ ।

द्वे शते त्रिनवत्यग्रे सप्तपञ्चाशदेव च । सहस्राणि कलाश्चान्या दश तच्चापपृष्ठकम् ॥ ६५

यो ५७२९३ । $\frac{१०}{१९}$ ।

सिद्धायतनकूटं च महाहिमवतोऽपि च । ततो परं हैमवतं रोहिताकूटमित्यपि ॥ ६६

ह्रीकूटं हरिकान्तायाः हरिवर्षकमेव च । वैडूर्यकूटमन्त्यं च रत्नं पञ्चाशदुच्छ्रयम् ॥ ६७

२४९३२$\frac{१}{१९}$ यो. बतलाया गया है] ॥ ५७ ॥ हिमवान् पर्वतके धनुषका प्रमाण पांचका वर्ग अर्थात् पच्चीस हजार दो सौ तीस योजन और चार कला (२५२३०$\frac{४}{६}$) जानना चाहिये ॥ ५८ ॥ सिद्धायतनकूट, हिमवान्कूट, भरतकूट, इलाकूट, गंगाकूट, श्रीकूट, रोहितास्याकूट, सिन्धुकूट, सुरादेवीकूट, हैमवतकूट, और वैश्रवणकूट; ये हिमवान् पर्वतके ऊपर स्थित ग्यारह कूट जातिसे रत्नमय हैं ॥ ५९–६० ॥ प्रत्येक कूट पच्चीस योजन उद्वेध (अवगाह) से सहित और उतना (२५ यो.) ही मूलमें विस्तृत है । उसका विस्तार मध्यमें चतुर्थ भागसे हीन पच्चीस (१८$\frac{३}{४}$) योजन और ऊपर साढे बारह (१२$\frac{१}{२}$) योजन मात्र है ॥ ६१ ॥ हैमवत क्षेत्रकी अन्तिम जीवाका प्रमाण सैंतीस हजार छह सौ चौहत्तर योजन और सोलह कला (३७६७४$\frac{१५}{१६}$) से कुछ कम है ॥ ६२ ॥ उसका धनुष अडतीस हजार सात सौ चालीस योजन और दस कला (३८७४०$\frac{१०}{१९}$ से कुछ अधिक है ॥ ६३ ॥ महाहिमवान् पर्वतकी जीवा तिरेपन हजार नौ सौ इकतीस योजन और छह कला (५३९३१$\frac{६}{१९}$) प्रमाण है ॥ ६४ ॥ उसका धनुषपृष्ठ सत्तावन हजार दो सौ तिरानवे योजन और दस कला (५७२९३$\frac{१०}{१९}$) प्रमाण है ॥ ६५ ॥ सिद्धायतनकूट, महाहिमवान्कूट, हैमवतकूट, रोहिताकूट, ह्रीकूट, हरिकान्ताकूट, हरिवर्षकूट और अन्तिम रत्नमय वैडूर्यकूट; ये आठ कूट महाहिमवान् पर्वतके ऊपर स्थित हैं । इनमेंसे प्रत्येक कूट पचास योजन

---

१ प वृतानि ।

त्रिसप्ततिसहस्राणि शतानि नव चैककम्। भागास्सप्तदशापि ज्या हरिवर्षोत्तरा स्मृता ॥ ६८

यो ७३९०१ । $\frac{17}{19}$ ।

सहस्राणामशीतिश्च चतुष्कस्य षोडश। चत्वारश्च तथा भागा धनुःपृष्ठमिहोदितम् ॥ ६९

यो ८४०१६ । $\frac{4}{19}$ ।

नवतिश्च सहस्राणि चत्वारि च पुनः शतम्[1]। षट्पञ्चाशच्च सैवा ज्या निषधे द्विकलाधिका ॥७०

यो ९४१५६ । $\frac{2}{19}$ ।

चतुर्विंशं सहस्राणां शतं च त्रिंशतानि च। षट्चत्वारिंशदग्राणि कला नव च तद्धनुः ॥ ७१

यो १२४३४६ । $\frac{9}{19}$ ।

चैत्यस्य निषधस्यापि हरिवर्षस्य चापरम्। पूर्वेषां च विदेहानां हरित्कूटं धृतेस्तथा ॥ ७२
सीतोदापरविदेहं रुचकं नवमं भवेत्। सर्वरत्नानि तानि स्युरुच्छ्रयः शतयोजनम् ७३ ॥
दक्षिणार्धस्य यन्मानमाविदेहेभ्य उच्यते। तदेवोत्तरभागस्य यथासंभवमुच्यताम् ॥ ७४
जीवाशोधित[2]जीवार्धं नामतश्चूलिकोच्यते। चापशोधित[2]चापार्धं भवेत्पार्श्वभुजेति च ॥ ७५

ऊंचा है ॥६६-६७॥ हरिवर्ष क्षेत्रकी उत्तर जीवा तिहत्तर हजार नौ सौ एक योजन और सत्तरह भाग (७३९०१ $\frac{17}{19}$) प्रमाण स्मरण की गई है ॥६८॥ इसके धनुषका प्रमाण यहां अस्सी और चार अर्थात् चौरासी हजार सोलह योजन तथा चार भाग (८४०१६$\frac{4}{19}$) प्रमाण कहा गया है ॥६९॥ नब्बे और चार अर्थात् चौरानबे हजार एक सौ छप्पन योजन और दो कला (९४१५६$\frac{2}{19}$), यह निषध पर्वतकी जीवाका प्रमाण है ॥ ७० ॥ इसके धनुषका प्रमाण सौ और चौबीस अर्थात् एक सौ चौबीस हजार तीन सौ छयालीस योजन और नौ कला (१२४३४६$\frac{9}{19}$) मात्र है ॥ ७१ ॥ चैत्य (सिद्ध) कूट, निषधकूट, हरिवर्षकूट, पूर्वविदेहकूट, हरित्कूट, धृतिकूट, सीतोदाकूट, अपरविदेहकूट और नौवां रुचककूट; इस प्रकार ये नौ कूट निषध पर्वतके ऊपर स्थित हैं। वे कूट सर्वरत्नमय हैं। उंचाई उनकी सौ योजन मात्र है ॥ ७२-७३ ॥

जम्बूदीपके दक्षिण अर्ध भागमें स्थित क्षेत्र-पर्वतादिकोंके विस्तारादिका प्रमाण जो विदेह क्षेत्र पर्यन्त यहां कहा गया है उसीको यथासम्भव उसके उत्तर अर्ध भागमें भी कहना चाहिये ॥ ७४ ॥ अधिक जीवामेंसे हीन जीवाको कम करके शेषको आधा करनेपर जो प्राप्त हो उसे चूलिका कहा जाता है। इसी प्रकार अधिक धनुषमेंसे हीन धनुषको कम करके शेषको आधा करनेपर जो प्राप्त हो उसे पार्श्वभुजा कहा जाता है ॥ ७५ ॥

---

१ आ प पुनः स्मृतम् । २ ब शोदित ।

सिद्धायतननीलौ च प्राग्विदेहस्तथैव च । सीताकीर्तिकूटौ च नरकान्तापरौ तथा ॥ ७६
अपरविदेहो रम्यकं चाष्टमं भवेत् । अपदर्शनकं चैव समधारणानि वेश्मतः ॥ ७७
सिद्धरुग्मी धरणिमो रम्यकं नारीकूटमेव च । बुद्धिश्चापि रूप्यकूलाया हैरण्यं मणिकाञ्चनम् ॥७८
सिद्धं शिखरिणः कूटं हैरण्यं रसदेविकम् । रक्ता लक्ष्मी[1] सुवर्णानां रक्तवत्याश्च नामतः ॥ ७९
गन्धवत्याश्च पवनं गान्धैरावतमित्यपि । मणिकाञ्चनकूटं च समानि हिमवद्गिरेः ॥ ८०
सिद्धायमुत्तरार्धं च तामिस्रगुहकं तथा । कूटं तु माणिभद्रं च विजयार्धकुमारकम् ॥ ८१
कूटं च पूर्णभाख्यं प्रपातं खण्डकस्य च । दक्षिणैरावतार्धं च अन्त्यं वैश्रवणं शुभम् ॥ ८२
सहस्रमायतः पञ्चस्तदर्धमपि विस्तृतः । योजनानि दशागाढे हिमवन्मूर्धनि ह्रदः ॥ ८३

। १००० ।

महापद्मोऽथ तिगिञ्छः केसरी च महानपि । पुण्डरीको ह्रदश्चाथ गिरिषु द्विगुणाः क्रमात् ॥ ८४

उदाहरण— (१) जैसे विजयार्धकी जीवाका प्रमाण १०७२०$\frac{१२}{१९}$ यो. है। इसमेंसे दक्षिण भरत क्षेत्रकी जीवा ९७४८$\frac{१२}{१९}$ को घटा देनेपर शेष ९७१$\frac{१६}{१९}$ रहते हैं। इसका अर्ध भाग ४८५$\frac{१७}{१९}$ यो. होता है। यह विजयार्धकी चूलिकाका प्रमाण होता है। (२) विजयार्धके धनुष १०७४३$\frac{१५}{१९}$ यो. मेंसे दक्षिण भरत क्षेत्रके धनुष ९७६६$\frac{१}{१९}$ घटाकर शेष (९७७$\frac{१४}{१९}$) को आधा कर देनेपर ४८८$\frac{१३}{१९}$ यो. होता है। यह विजयार्धकी पार्श्वभुजाका प्रमाण होता है।

सिद्धायतन, नील, प्राग्विदेह, सीताकूट, कीर्तिकूट, नरकान्ता, अपरविदेह, रम्यक और अपदर्शन; ये निषध पर्वतके ऊपर स्थित कूटोंके समान प्रमाणवाले नौ कूट नील पर्वतके ऊपर स्थित हैं ॥ ७६–७७ ॥ सिद्ध, रुग्मि, रम्यक, नारी, बुद्धि, रुप्यकूला, हैरण्य और मणिकांचन; ये आठ कूट रुग्मि पर्वतके ऊपर स्थित है ॥ ७८ ॥ सिद्ध, शिखरी, हैरण्य, रसदेवी, रक्ता, लक्ष्मी, सुवर्ण, रक्तवती, गन्धवती, ऐरावत और मणिकांचन; ये ग्यारह कूट हिमवान् पर्वतके समान शिखरी पर्वतके ऊपर स्थित है ॥ ७९–८० ॥ सिद्ध, उत्तरार्ध ऐरावत, तमिस्रगुह, माणिभद्र, विजयार्धकुमार, पूर्णभद्र, खण्डप्रपात, दक्षिण ऐरावतार्ध और अन्तिम वैश्रवण; ये नौ कूट ऐरावत क्षेत्रके विजयार्धके ऊपर स्थित हैं ॥८१–८२॥

हिमवान् पर्वतके ऊपर एक हजार (१०००) योजन लम्बा, उससे आधा अर्थात् पांच सौ (५००) योजन विस्तारवाला और दस (१०) योजन गहरा पद्म नामका तालाब स्थित है ॥८३॥ आगे महाहिमवान् आदि शेष पांच पर्वतोंके ऊपर इससे दूने प्रमाणवाले (उत्तरके

---

१ ब 'सिद्धायं' नास्ति । २ अ प लक्ष्मी ।

योजनोच्छ्रयविष्कम्भं सलिलार्धमुद्गतम् । गव्यूतिकर्णिकं पद्मं तत्र श्री रत्नवेश्मनि ॥८५

। १ ।
२

चत्वारिंशच्छतं चैव सहस्राणामुदाहृतम् । शतं पञ्च दशाग्रं च परिवारः श्रीगृहस्य तत् ॥ ८६

। १४०११५ ।

ह्रीर्धृतिः कीर्तिबुद्धी च लक्ष्मीश्चैव ह्रदालयाः । शक्रस्य दक्षिणा देव्य ईशानस्योत्तरा स्मृताः ॥८७
गङ्गा पद्मह्रदात् सिन्धू रोहितास्या च निर्गताः । रोहिच्च हरिकान्ता च महापद्मह्रदात् स्मृते[2] ॥८८
निषधाद्धरिच्च सीतोदा महानद्यौ विनिर्गते । सीता च नरकान्ता च प्रस्मुते केसरि[3] ह्रदात् ॥८९
नारी च रूप्यकूला च रुक्मिशैलादधोगते । सुवर्णा च तथा रक्ता रक्तोदापि च षष्ठतः ॥९०
गङ्गावज्रमुखव्यासः क्रोशः षड्योजनानि च । अर्धक्रोशो ऽवगाहस्तु सर्वमन्ते दशाहृतम् ॥९१

यो ६२ क्रो १ क्रो ५ (?)

तीन दक्षिणके तीनके समान) क्रमशः महापद्म, तिगिंछ, केसरी, महापुण्डरीक और पुण्डरीक ये पांच तालाब स्थित हैं ॥८४॥ पद्म ह्रदमें एक योजन ऊंचाई व विस्तारवाला, जलसे आधा ($\frac{1}{2}$) योजन ऊंचा और एक कोस विस्तृत कर्णिकासे संयुक्त कमल है। इसके ऊपर रत्नमय भवनमें श्री देवीका निवास है ॥८५॥ श्री देवीके गृहके परिवारस्वरूप वहां एक सौ चालीस हजार अर्थात् एक लाख चालीस हजार एक सौ पन्द्रह (१४०११५) अन्य गृह हैं ॥ ८६ आगे महापद्म आदि ह्रदोंमें क्रमसे ह्री, धृति, कीर्ति, बुद्धि और लक्ष्मी इन देवियोंके भवन हैं। इनमें दक्षिणकी देवियां (श्री, ह्री और धृति) सौधर्म इन्द्रकी और उत्तरकी (कीर्ति, बुद्धि और लक्ष्मी) देवियां ईशान इन्द्रकी स्मरण की गयी हैं॥८७॥

पद्म ह्रदसे गंगा, सिन्धू और रोहितास्या ये तीन महानदियां, तथा महापद्म ह्रदसे रोहित् और हरिकान्ता ये दो महानदियां निकली हैं ॥८८॥ निषध पर्वतस्थ ह्रदसे हरित् और सीतोदा महानदियां तथा केसरी ह्रदसे सीता और नरकान्ता महानदियां निकली हैं ॥८९॥ रुक्मि शैलके ऊपर स्थित ह्रदसे नारी और रूप्यकूला तथा छठे ह्रदसे सुवर्णकूला, रक्ता और रक्तोदा ये महानदियां निकली हैं ॥९०॥

गंगा नदीका वज्रमय मुखविस्तार एक कोस और छह (६$\frac{1}{2}$) योजन, अवगाह आधा ($\frac{1}{2}$) कोस तथा अन्तिम विस्तार मुखविस्तारसे दसगुना (६२$\frac{5}{2}$ यो.) है ॥९१॥ यह गंगा नदी

---

१ ब °च्छ्रय । २ आ प सुते । ३ आ प प्रस्तुते केसरी ।

गत्वा पञ्चशतं प्राच्यां मन्दरं वर्षं त्रिभुत्य च । दक्षिणा भरतव्यासे पञ्चविंशे च पर्वतात् ॥९२
सक्रोशषट्शतं त्यक्त्वा विस्तीर्णा षड्गुणा सार्धयोजनम् । जिह्विका वृषभाकारास्त्यायता सार्धयोजनम् ॥९३

यो ६ को १

जिह्विकायां गता गङ्गा पतन्ती श्रीगृहे शुभे । गोशृङ्गसंस्थिता भूत्वा पतिता दशविस्तृता ॥९४
कूटाकृतिं दधानस्य श्रीगृहस्योचितद्युतेः । कूटान्तस्थितजैनेन्द्रप्रतिबिम्बस्य भास्वतः ॥९५
प्रभाप्रोक्षरि हा गङ्गा रङ्गत्तुङ्गतरङ्गिणी । स्वस्यास्योधारया सम्यगभिषेक्तुमना इव ॥९६
जटामुकुटमालाढ्यं प्रणतधारिनिर्घोषकम् । नमामि जिनवल्लभं कमलकर्णिकाविष्टरम् ॥९७
योजनानां भवेत् षष्टिः कुण्डस्य दश गाधकम् । मध्ये ऽष्ट विस्तृतो द्वीपो जलाद्द्विक्रोशमुच्छ्रितः ॥९८
मूले मध्ये च शिखरे चतुर्द्व्येकानि[1] विस्तृतः । योजनानि दशोद्विद्धो द्वीपे वज्रमयो गिरिः ॥९९

। ४।२।१ ।

पद्म द्रहसे निकलकर पांच सौ योजन पूर्वकी ओर जाती हुई गंगाकूटके दो कोस इधरसे दक्षिणकी ओर लौटकर [और फिर पांच सौ तेईस योजन और साधिक आधा कोस पर्वतके ऊपर जाकर] भरत क्षेत्रमें पांचके वर्ग प्रमाण अर्थात् पच्चीस योजन पर्वतसे [उसे छोड़कर नीचे गिरती है] । यहांपर सवा छह ($६\frac{१}{४}$) योजन विस्तीर्ण, आधा योजन बाहल्यसे संयुक्त, और आधा योजन ही आयत वृषभाकार जिह्विका (नाली) है। इस नालीमें प्रविष्ट होकर वह गंगा उत्तम श्रीगृहके ऊपर गिरती हुई गोसींगके आकार होकर दस योजन विस्तारके साथ नीचे गिरी है । ॥९२–९४॥ जो श्रीगृह कूटकी आकृतिको धारण करनेवाला, वृद्धिगत कान्तिसे सहित, कूटके अन्तमें स्थित जिनेन्द्रप्रतिबिम्बसे संयुक्त, तथा प्रभाश्वर है; उसके ऊपर अपनी चंचल उन्नत तरंगोंसे संयुक्त वह गंगा मानो अपनी जलधारासे जिनेन्द्र देवका अभिषेक करनेकी इच्छासे ही गिरती है ॥९५–९६॥ यह प्रतिमा जटा, मुकुट एवं मालासे सुशोभित; नम्रीभूत जलके निर्घोष (शब्द) से सहित और कमलकी कर्णिकारूप आसनपर विराजमान है। उसके लिये मैं नमस्कार करता हूं ॥९७॥

उस कुण्डका विस्तार साठ योजन और गहराई दस योजन है। इसके मध्यमें जलसे दो कोस ऊंचा और आठ योजन विस्तृत द्वीप है ॥९८॥ इस द्वीपमें दस योजन ऊंचा वज्रमय पर्वत है। उसका विस्तार मूलमें चार, मध्यमें दो और शिखरपर एक योजन मात्र है ॥९९॥

---

१ ब चतुर्द्व्येकानि ।

धनुस्त्रिसहस्रं मूलमध्यावविस्तृतम् । पञ्चशत्यर्धमन्तश्च द्विसहस्रोच्छ्रितं गृहम् ॥१००
३००० । २००० । १००० । ७५० । २००० ।
चत्वारिंशद्धनुर्व्यासं तत्सार्धञ्च द्विगुणोच्छ्रयम् । वज्रयुग्मकवाटं च द्वारं गिरिगृहस्य[1] च ॥१०१
। ४० । ८० ।
कुण्डाद्दक्षिणतो गत्वा भूमिभागेषु वक्रिता । विजयार्धगुहायां च अष्टयोजनविस्तृता ॥१०२
सहस्रैः सप्तभिर्गङ्गा द्विगुणैः सरितां सह । संगता प्राग्मुखं गत्वा प्राविशल्लवणोदधिम् ॥१०३
। १४००० ।
त्रिगव्यूति त्रिनवतिं गङ्गातोरणमुच्छ्रितम् । अर्धयोजनगाधं च नदीविस्तारविस्तृतम् ॥१०४
। यो ९३ क्रो ३ । यो ६२ क्रो २ ।
सदृशी गङ्गया सिन्धुः विग्विभागाद्विना पुनः । जिह्विकादीनि सरितां द्विगुणान्याविदेहतः॥१०५
तोरणेषु वसन्त्येषु दिक्कुमार्यो वराङ्गनाः । तोरणानां तु सर्वेषामवगाहः समो मतः ॥१०६
द्वे शते[2] सप्तति षट् च षट्कलाश्चोत्तरामुखम् । रोहितास्या गिरौ गत्वा पतित्वा श्रीगृहे गता ॥१०७
यो २७६ । ६/१२ ।

श्रीगृहका विस्तार मूलमें तीन हजार, मध्यमें दो हजार और ऊपर एक हजार धनुष प्रमाण तथा अभ्यन्तर विस्तार पांच सौ और उनके आधे अर्थात् साढ़े सात सौ धनुष प्रमाण है। उसकी ऊंचाई दो हजार धनुष मात्र है॥१००॥ वज्रमय कपाटयुगलसे संयुक्त उस श्रीगृहका द्वार चालीस (४०) धनुष विस्तृत और इससे दूना (८०) ऊंचा है॥१०१॥

गंगा नदी इस कुण्डसे दक्षिणकी ओर जाकर आगेके भूमिभागोंमें कुटिलताको प्राप्त होती हुई विजयार्धकी गुफामें आठ योजन विस्तृत होकर प्रविष्ट होती है॥१०२॥ अन्तमें वह दुगुने सात अर्थात् चौदह हजार नदियोंसे संयुक्त होकर पूर्वकी जाती हुई लवण समुद्रमें प्रविष्ट हुई है॥१०३ समुद्रके प्रवेशस्थानमें तेरानबै योजन और तीन कोस ऊंचा, आधा योजन अवगाहसे सहित तथा नदीविस्तारके बराबर विस्तृत गंगातोरण है॥१०४॥ दिग्विभागको छोड़कर शेष विस्तार आदिके विषयमें सिन्धु नदी गंगाके समान है। इन नदियोंकी नाली आदि विदेह पर्यन्त उत्तरोत्तर दूनी दूनी है॥१०५॥ इन तोरणोंके ऊपर दिक्कुमारी वरांगनायें (उत्तम महिलायें) निवास करती हैं। सब तोरणोंका अवगाह समान माना गया है॥१०६॥

रोहितास्या नदी हिमवान् पर्वतके ऊपर दो सौ छयत्तर योजन और छह कला

---

१ आ प गृहस्य । २ आ प शते ।

रोहिच्च षोडशशतौ तु पञ्चाधिकानि हि । भागत्वं च कलाः पञ्च शतार्धं पतिता गिरेः॥१०८

यो १६०५ । ५ ।

हरीकान्ता हरिकान्ता च तावदेव गता गिरौ । संप्राप्य च शते कुण्डं समुद्रं पश्चिमं गता ॥१०९
एकविंशतिं चत्वारि सप्ततिं च शतानि तु । कलां च हरिदागत्य निषधे पतिता भुवि ॥११०

यो ७४२१ । ५ ।

सीतोदापि ततो गत्वा तावदेव गिरिस्थले[1] । द्विशताच्च भुवं प्राप्य पश्चिमाम्बुनिधिं गता ॥१११
गङ्गा रोहिद्धरित्सीता नारी च सरिदुत्तमा । सुवर्णा च तथा रक्ता पूर्वाः शेषाश्च पश्चिमाः॥११२
श्रद्धावान् विजटावांश्च पद्मवानपि गन्धवान् । वृत्तास्ते विजयाद्यास्या मध्य[ध्ये] हैमवतादिषु॥११३
सहस्रविस्तृता मूले मध्ये तत्तुर्यहीनकाः । शिखरेषं सहस्रं तु सहस्रं शुद्धमुच्छ्रिताः ॥ ११४

१००० । ७५० । ५०० । १००० ।

ते च शैला महारम्याः नानामणिविभूषिताः । कुक्कुटाण्डप्रकाशाभा दृष्टाः केवललोचनैः ॥११५

(१०५२ $\frac{१२}{१९}$—५००÷२=२७६ $\frac{६}{१९}$) उत्तरकी ओर जाकर और फिर नीचे गिरकर श्रीगृहको प्राप्त हुई है ॥१०७॥ रोहित् नदी सोलह सौ पांच योजन और पांच कला (४२१०$\frac{५}{१९}$—१०००÷२=१६०५ $\frac{५}{१९}$) प्रमाण आकर हिमवान् पर्वतको पचास योजन छोड़ती हुई उससे नीचे गिरी है ॥१०८॥ हरिकान्ता नदी भी उत्तरमें उतने (१६०५ $\frac{५}{१९}$) ही योजन पर्वतके ऊपर जाकर और फिर सौ योजन पर्वतको छोड़कर कुण्डको प्राप्त होती हुई पश्चिम समुद्रमें प्रविष्ट हुई है ॥१०९॥ हरित् नदी चौहत्तर सौ इक्कीस योजन और एक कला प्रमाण १६८४२ $\frac{३}{१९}$—२०००÷२=७४२१ $\frac{१}{१९}$) निषध पर्वतके ऊपर आकर उससे नीचे पृथिवीमें गिरी है ॥११०॥ सीतोदा नदी भी निषध पर्वतके ऊपर उतने (७४२१ $\frac{१}{१९}$) ही योजन जाकर और उसे दो सौ योजन छोड़कर पृथिवीपर गिरती हुई पश्चिम समुद्रमें प्रविष्ट हुई है ॥१११॥ गंगा, रोहित्, हरित्, सीता, नारी, सुवर्णकूला और रक्ता; ये पूर्वकी महानदियां पूर्व समुद्रमें तथा शेष नदियां पश्चिम समुद्रमें प्रविष्ट हुई हैं॥११२॥

हैमवत आदि (हैमवत, हरि, रम्यक और हैरण्यवत) चार क्षेत्रोंके मध्यमें श्रद्धावान्, विजटावान्, पद्मवान् और गन्धवान्; ये विजयार्ध नामसे प्रसिद्ध चार वृत्त (गोलाकार) पर्वत हैं ॥११३॥ वे पर्वत मूलमें एक हजार योजन विस्तृत, मध्यमें उसके चतुर्थ भागसे हीन अर्थात् साढ़े सात सौ योजन विस्तृत, शिखरपर पांच सौ योजन विस्तृत और शुद्ध एक हजार योजन ऊंचे हैं ॥११४॥ वे पर्वत अतिशय रमणीय, नाना मणियोंसे विभूषित और मुर्गाके अण्डेके

---

१ ब गिरिस्थिते ।

ते नाभिगिरयो नाम्ना तानप्यर्धयोजनात् । प्रदक्षिणगता नद्यः उभे मन्दरतोऽपि च ॥११६
शिखरेषु गृहेष्वेषां स्वातिश्चारण एव च । व्यन्तरः पद्मनामा च प्रभासश्च वसन्ति ते ॥११७
भरताद्यानि क्षेत्राणि गङ्गाद्या हिमवादयः । धातकीखण्डके द्विर्द्विः पुष्करार्धे च संख्यया ॥११८
द्वीपान् व्यतीत्य संख्येयान् जम्बूद्वीपोऽन्य इष्यते । तत्र सन्ति पुराण्येषामिह ये वर्णिताः सुरैः ॥११९
त्रयस्त्रिंशत्सहस्राणि षट्छतानि चतुष्कलाः । अशीतिश्चतुरघ्ना च विदेहानां तु विस्तृतिः ॥ १२०

यो ३३६८४ । ४/६ ।

नीलमन्दरयोर्मध्ये उत्तराः कुरवः स्थिताः । मेरोश्च निषधस्यापि[1] देवाह्वाः कुरवः स्मृताः ॥१२१
विदेहविस्तृतिः पूर्वा मन्दरव्यासवर्जिता । तदर्धं कुरुविस्तारो दृष्टः सर्वज्ञपुंगवैः ॥१२२
एकादश सहस्राणि शतान्यष्टौ च विस्तृताः । द्विचत्वारिंशदग्राणि कुरवो द्वे कले[2] तथा ॥ १२३

यो ११८४२ । २/६ ।

चत्वारिंशच्छतं त्रीणि सहस्राण्येकसप्ततिः । चतुःकला नवांशश्च कुरुवृत्तं विबुर्बुधाः ॥१२४

समान कान्तिवाले हैं; ऐसा केवलज्ञानियोंके द्वारा देखा गया है ॥११५॥ वे पर्वत नाभिगिरि इस नामसे प्रसिद्ध हैं। रोहित् और रोहितास्या आदि नदियां इन पर्वतोंसे आधा योजन इधर रहकर तथा दो (सीता और सीतोदा) नदियां मंदर पर्वतसे आधा योजन इधर रहकर प्रदक्षिण रूपसे चली जाती हैं ॥११६॥ इन पर्वतोंके शिखरोंपर स्थित गृहोंमें क्रमशः स्वाति, चारण, पद्म और प्रभास नामक व्यन्तर देव रहते हैं ॥११७॥ भरतादिक क्षेत्र, गंगादिक नदियां तथा हिमवान् आदि पर्वत; ये सब धातकीखण्ड द्वीपमें और पुष्करार्ध द्वीपमें जम्बूद्वीपकी अपेक्षा संख्यामें दूने दूने हैं ॥११८॥

संख्यात द्वीपोंको लांघकर दूसरा एक जम्बूद्वीप है। वहांपर जिन व्यन्तर देवोंका यहां अभी वर्णन किया गया है उनके पुर हैं ॥११९॥

विदेहक्षेत्रोंका विस्तार तेतीस हजार छह सौ चौरासी योजन और चार कला ($३३६८४\frac{४}{६}$) प्रमाण है ॥१२०॥ नील पर्वत और मेरु पर्वतके मध्यमें उत्तरकुरु स्थित हैं। मेरु और निषध पर्वतोंके मध्यमें देवकुरुओंका स्मरण किया गया है ॥१२१॥ पूर्वनिर्दिष्ट विदेहके विस्तारमेंसे मंदर पर्वतके विस्तारको घटा कर आधा करनेपर कुरुक्षेत्रोंका विस्तार होता है, जो कि सर्वज्ञ देवोंके द्वारा प्रत्यक्ष देखा गया है ॥१२२॥ कुरुक्षेत्रोंका उक्त विस्तार ग्यारह हजार आठ सौ ब्यालीस योजन और दो कला ($११८४२\frac{२}{६}$) प्रमाण है ॥१२३॥ इकत्तर हजार एक सौ तेतालीस योजन और चार कला ($७११४३\frac{४}{६}$) तथा एक कलाका नौवां अंश ($\frac{१}{९×६}$) इतना

---

१ आ प °श्चापि । २ प कुले ।

यो ७११४३ । ५ । २ ।

विस्तारस्तस्य वृत्तस्य तथा परिरयस्य च । षट्त्रिंशत्सहस्राणि त्रयः पञ्चशतानि च ॥१२३

५३००० । ६०४१८ । ३ ।

मेरोः पूर्वोत्तरस्यां वै सीतापूर्वतटात्परम्[1] । आसन्नं नीलशैलस्य स्थलं जम्बूः प्रकीर्तितम् ॥१२६

अर्धयोजनबाहुल्यं उद्वेधाष्टमभागिकम्[2] । वेदिका रत्नसंकीर्णा स्थलस्योपरि सर्वतः ॥१२७

। ½ ।

स्थले सहस्रार्धपृथौ[3] मध्येऽष्टबहले पुनः । अन्ते द्विकोशबहले जाम्बूनदमये शुभे ॥१२८

द्वादशाष्टौ च चत्वारि मूलमध्योर्ध्वविस्तृता । पीठिकाष्टोच्छ्रिता तस्या द्वादशाम्बुजवेदिकाः ॥१२९

द्वियोजनोच्छ्रितस्कन्धा मूले गव्यूतिविस्तृता । अष्टयोजनशाखा सा त्रवगाढार्धयोजनम् ॥१३०

। को १ ।

अश्मगर्भस्थिरस्कन्धा वज्रशाखा मनोरमा । राजते राजितैः पत्रैरङ्कुरैर्मणिजातिभिः ॥१३१

फलैर्मृदङ्गसंकाशैर्जम्बूः स्तूपसमाकृतिः[4] । पृथिवीपरिणामा सा जीवाव[5]क्रान्तिजातिका (?) ॥१३२

कुरुक्षेत्रका वृत्तविस्तार है ॥१२४॥ कुरुक्षेत्रकी जीवाका प्रमाण तिरेपन हजार (५३०००) योजन तथा उसके धनुषका प्रमाण साठ हजार चार सौ अठारह योजन और बारह कला (६०४१८$\frac{3}{12}$) प्रमाण है ॥१२५॥

मेरु पर्वतके पूर्व-उत्तर (ईशान) कोणमें सीता नदीके पूर्व तटपर नील पर्वतके पासमें जंबू वृक्षका स्थल बतलाया गया है ॥१२६॥ इस स्थलके ऊपर सब ओर आधा योजन ऊंची और ऊंचाईके आठवें भाग ($\frac{1}{8}$यो.) प्रमाण विस्तारवाली रत्नोंसे व्याप्त एक वेदिका है ॥१२७॥ पांच सौ योजन विस्तारवाले और मध्यमें आठ योजन तथा अन्तमें दो कोस बाहल्यसे संयुक्त उस सुवर्णमय उत्तम स्थलके ऊपर मूलमें, मध्यमें और ऊपर यथाक्रमसे बारह, आठ और चार योजन विस्तृत तथा आठ योजन ऊंची जो पीठिका है उसके बारह पद्मवेदिकायें हैं ॥१२८–१२९॥ इस स्थलके ऊपर जो जंबू वृक्ष स्थित है उसका स्कंध (तना) दो योजन ऊंचा, मूलमें एक कोस विस्तृत और आधा योजन अवगाहसे संयुक्त है। उसकी आठ योजन दीर्घ चार शाखायें हैं ॥१३०॥ हरित् मणिमय स्थिर स्कन्धवाला एवं वज्रमय शाखाओंसे मनोहर वह वृक्ष विविध मणिभेदोंसे शोभायमान पत्रों एवं अंकुरोंसे सुशोभित है ॥१३१॥ मृदंग जैसे फलोंसे स्तूपके समान आकृतिको धारण करनेवाला वह जंबू वृक्ष पृथिवीके परिणामस्वरूप.....(?) ॥१३२॥

---

१ ब पूर्वोत्तरात्परं । २ ब उद्वेधाष्ट । ३ ब ०र्धं पृथौ । ४ ब मूले । ५ ब जैम्बूस्तूप ।

उत्तरस्यां तु शाखायामर्हदायतनं शुभम् । सिसृक्षव्यासु वेश्मानि[1] बाह्यादरानादरयोः ॥१३३
तस्या अम्बा अधस्तात्तु त्रिंशतं विस्तृतानि हि । उच्छ्रितानि शतार्धं भवनान्युक्तदेवयोः ॥१३४
आरभ्य बाह्यतः शून्यं प्रथमे च द्वितीयके । तृतीयेऽपि च देवानामष्टाधिकशतद्रुमाः ॥१३५
चतुर्थे प्राक् च देवीनां चतुर्वृक्षाश्च पञ्चमे । वनं वाप्यश्चतुष्कोण[2]वृत्ताद्याः षष्ठके नभः ॥१३६
प्रत्येकं च चतुर्दिक्षु सप्तमे तनुरक्षिणां । सहस्राणां च चत्वारि वृक्षास्तिष्ठन्ति मञ्जुलाः ॥१३७
। मिलित्वा १६००० ।
सामानिकसुराणां स्युरष्टमे पिण्डिता द्रुमाः । ईशाने चोत्तरे वाते सहस्राणां चतुष्टयम् ॥१३८
नवमे दशमे चैकादशे वह्नौ च दक्षिणे । नैर्ऋत्यां त्रिपरिषदामन्तर्मध्यान्तवर्तिनाम् ॥१३९
द्वात्रिंशच्च सहस्राणां चत्वारिंशत्तथा पुनः । चत्वारिंशत्तथाष्टाग्रा जम्बूवृक्षा यथाक्रमम् ॥१४०
सेनामहत्तराणां च द्वादशे सप्त पश्चिमे । पद्मस्य परिवारेभ्यः पञ्चाग्रा मुख्यसंयुता ॥१४१
[3]। मुख्यसहितपरिवारवृक्षाः १४०१२० ।

उसकी उत्तर दिशागत शाखाके ऊपर उत्तम जिनभवन तथा अन्य तीन शाखाओंके ऊपर आदर और अनादर नामक व्यन्तर देवोंके भवन हैं ॥१३३॥ उस जंबू वृक्षके नीचे तीन सौ योजन विस्तृत और पचास योजन ऊंचे उक्त दोनों देवोंके भवन हैं ॥१३४॥

उपर्युक्त बारह पद्मवेदिकाओंमें बाह्य वेदिकाकी ओरसे प्रारम्भ करके प्रथम और द्वितीय अन्तरालमें शून्य और तृतीय अन्तरालमें देवोंके एक सौ आठ वृक्ष हैं॥१३५॥ चतुर्थ अन्तरालमें पूर्व दिशामें देवियोंके चार वृक्ष, पंचम अन्तरालमें वन व चतुष्कोण एवं गोल आदि वापियां तथा छठे अन्तरालमें शून्य है ॥१३६॥ सातवें अन्तरालमें चारों दिशाओंमेंसे प्रत्येक दिशामें तनुरक्षक देवोंके सुन्दर चार हजार वृक्ष स्थित हैं ॥१३७॥ आठवें अन्तरालमें ईशान, उत्तर और वायु दिशाओंमें सामानिक देवोंके सब मिलकर चार हजार वृक्ष हैं ॥१३८॥ नौवें, दशवें और ग्यारहवें अन्तरालमें अग्नि, दक्षिण और नैर्ऋत्य दिशाओंमें अभ्यन्तर, मध्यम और बाह्य पारिषद देवोंके यथाक्रमसे बत्तीस हजार, चालीस हजार और अड़तालीस हजार जम्बूवृक्ष हैं ॥१३९-१४०॥ बारहवें अन्तरालमें पश्चिम दिशामें सेनामहत्तरोंके सात वृक्ष हैं। पद्मके परिवार पद्मोंकी अपेक्षा ये जम्बूवृक्ष एक मुख्य तथा चार अग्रदेवियोंके इस प्रकार पांच वृक्षोंसे अधिक हैं, अर्थात् वे इन मुख्य वृक्षोंसे सहित परिवार वृक्ष १४०१२० हैं ॥१४१॥

---

१ ब ब वेश्मनि पादरा० । २ ब कोण० । ३ आ सपरिवार° ।

मेरुदक्षिणपश्चिमे मेरोः सीतोदायाश्च पश्चिमे तटे । निषधं निषधस्यैव स्थलं चारुतरं शुभम् ॥१४२
तत्र शाल्मलिरुत्तमा जम्बूसदृशवर्णना । तस्या दक्षिणशाखायां सिद्धायतनमुत्तमम् ॥१४३
शेषासु दिक्षु वेश्मानि तीणि तत्र सुरावनि । वेणुश्च वेणुधारी च देवकुर्वधिवासिनौ ॥ १४४
नीलतो दक्षिणस्यां तु सहस्रे कूटपूर्वकम् । सीतायाः प्राक्तटे चित्रं विचित्रमपरे तटे ॥ १४५

। १००० ।

निषधस्योत्तरस्यां च सीतोदायास्तटद्वये । पुरस्ताद्यमकं कूटं मेघकूटं तु पश्चिमम् ॥१४६
सहस्रं विस्तृतं मूले मध्ये तत्तुर्यहीनकम् । शिखरेऽर्धसहस्रं तु सहस्रं शुद्धकुच्छ्रितम् ॥१४७

। १००० । ७५० । ५०० ।

प्रमाणेनैवमेकैकं कूटमाहुर्महर्षयः । कूटसंज्ञासुरास्तत्र मोदन्ते सुखिनः सदा[1] ॥१४८
सार्धे सहस्रे नीलाद् ह्रे[2] नीलनामा ह्रदस्ततः । कुरुनामा च चन्द्रश्च तस्मादैरावतः परम् ॥१४९

। २५०० ।

माल्यवान् दक्षिणे[णे] नद्यां सहस्रार्धान्तराश्च ते । पद्मह्रदसमा मानैरायता दक्षिणोत्तरम् ॥१५०

। ५०० ।

मेरुके दक्षिण-पश्चिममें सीतोदाके पश्चिम तटपर निषध पर्वतके समीपमें उत्तम रजतमय स्थल है ॥१४२॥ वहांपर शाल्मलि वृक्षका अवस्थान बतलाया गया है। उसका वर्णन जंबू वृक्षके समान है। उसकी दक्षिण शाखापर उत्तम सिद्धायतन है ॥१४३॥ शेष दिशागत शाखाओं-पर तीन भवन हैं। उनमें देवकुरु अधिवासी वेणु और वेणुधारी देव रहते हैं ॥१४४॥ नील पर्वतसे दक्षिणकी ओर हजार (१०००) योजन जाकर सीता महानदीके पूर्व तटपर चित्र और पश्चिम तटपर विचित्र नामक दो कूट हैं ॥१४५॥ निषध पर्वतकी उत्तर दिशामें भी सीतोदा महानदीके दोनों तटोंमेंसे पूर्व तटपर यमककूट और पश्चिम तटपर मेघकूट स्थित है ॥१४६॥ इन कूटोंका विस्तार मूलमें एक हजार (१०००) योजन, मध्यमें उससे चतुर्थ भाग हीन अर्थात् साढ़े सात सौ (७५०) योजन और शिखरपर अर्ध सहस्र (५००) योजन प्रमाण है। ऊंचाई उनकी शुद्ध एक हजार योजन मात्र है ॥१४७॥ इस प्रकार महर्षि जन उक्त कूटोंमेंसे प्रत्येक कूटका प्रमाण बतलाते हैं। उनके ऊपर सदा सुखी रहनेवाले कूटनामधारी देव आनंद-पूर्वक रहते हैं ॥१४८॥

नील पर्वतके दक्षिणमें सार्ध दो हजार अर्थात् अढ़ाई हजार (२५००) योजन जाकर नील, कुरु, चन्द्र, उसके आगे ऐरावत और माल्यवान् ये पांच ह्रद सीता नदीके मध्यमें हैं। ये प्रमाणमें पद्मह्रदके समान होते हुए दक्षिण-उत्तर आयत हैं। इनके मध्यमे पांच सौ (५००)

---

१ आ प्रतौऽग्रे 'निषधस्योत्तरस्यां च' इत्यादि श्लोकः (१४६) पुनर्लिखितोऽस्ति। २ आ प प्रतिषु ह्रे।

निषधाद्युत्तरस्यां च नद्यां तु[1] निषधो ह्रदः । कुरुनामा च सूर्यश्च सुलसो विद्युदेव च ॥ १५१
रत्नचित्रतटा वज्रमूलाश्च विपुला ह्रदाः । वसन्ति तेषु नागानां कुमार्यः पद्मवेश्मसु ॥ १५२
अर्धयोजनमुद्विद्धं योजनोच्छ्रयविस्तृतम् । पद्मं गव्यूतिविपुला कर्णिका तावदुच्छ्रिता ॥ १५३
चत्वारिंशच्छतं चैव सहस्राणामुदाहृतम् । शतं पञ्चदशाढ्यं च परिवारोऽम्बुजस्य[2] सः ॥ १५४
। १४०११५ ।
तटद्वये ह्रदानां च प्रत्येकं दशसंख्यकाः । काञ्चनाख्याचलाः सन्ति ते ह्रदाभिमुखस्थिताः ॥ १५५
उक्तं च – [ति. प. ४ – २०४९]
एक्केक्कस्स दहस्स य[3] पुव्वदिसाये य अवरदिब्भागे । वह वह कंचणसेला[4] जोयणसयमेसउच्छेहा ॥१
। १०० ।
शतं मूलेषु विपुला मध्ये पञ्चकृतेर्विना । त्वग्रे पञ्चाशतं रुन्द्राः शतोच्छ्रायाश्च ते समाः ॥१५६
। [१००] । ७५ । ५० । १०० ।
आक्रीडावासकेष्वेषां[5] शिखरेषु शुकप्रभाः । देवा काञ्चनका नाम वसन्ति मुदिताः सदा ॥ १५७
उक्तं च – [त्रि. सा. ६६०; ति प ४–२१२८]

योजनका अन्तर है ॥ १४९–१५० ॥ निषध पर्वतके उत्तरमें सीतोदा नदीके मध्यमें निषध, कुरु, सूर्य, सुलस और विद्युत् नामके पांच द्रह हैं ॥ १५१ ॥ इन विशाल द्रहोंके तट रत्नोंसे विचित्र हैं । मूल भाग इनका वज्रमय है । उनके भीतर पद्मभवनोंमें नागकुमारियां रहती है ॥ १५२ ॥ जलसे पद्मकी ऊंचाई आधा योजन है । वह एक योजन ऊंचा और उतना ही विस्तृत है । उसकी कर्णिकाका विस्तार एक कोस तथा ऊंचाई भी उतनी ही है ॥ १५३ ॥ उस पद्मके परिवारका प्रमाण एक लाख चालीस हजार एक सौ पन्द्रह (१४०११५) कहा गया है ॥ १५४ ॥ द्रहोंके दोनों तटोंमेंसे प्रत्येक तटपर दस दस कांचन पर्वत हैं जो उक्त द्रहोंके अभिमुख स्थित हैं ॥ १५५ ॥ कहा भी है —

प्रत्येक द्रहके पूर्व दिग्भाग और पश्चिम दिग्भागमें एक सौ (१००) योजन मात्र ऊंचे दस दस कांचन पर्वत हैं ॥ १ ॥

वे पर्वत मूलमें सौ (१००) योजन, मध्यमें पांचके वर्ग स्वरूप पच्चीससे रहित अर्थात् पचत्तर (७५) योजन और अग्रभागमें पचास (५०) योजन विस्तृत तथा सौ (१००) योजन ऊंचे है । यह प्रमाण समान रूपसे उन सभी पर्वतोंका है ॥ १५६ ॥ क्रीड़ाके आवास-रूप इन पर्वतोंके शिखरोंपर तोताके समान कान्तिवाले कांचन देव निवास करते हैं जो सदा प्रमुदित रहते हैं ॥ १५७ ॥ कहा भी है—

---

१ प नद्यास्तु । २ ब ०राब्जस्य । ३ आ प दहस्स ह य । ४ ब सोला । ५ प 'ष्वेषां ।

ह्रदयोः पंचमागे सहस्रद्वयं द्विनवति योजनानि द्वे च कले। नदीद्वारयुता वेदी दक्षिणोत्तरभद्रशालस्य॥२

। २०९२ ।

पूर्वापरभागेषु सा गजदंताचलाभ्यां संलग्ना। इगियोयणमुस्सेहा जोयणअद्धस्स वित्थारा ॥ ३ ॥

सीताया उत्तरे तीरे कूटं पद्मोत्तरं मतम्। दक्षिणं नीलवत्कूटं पुरस्तान्मेरुपर्वतात् ॥ १५८

सीतोदापूर्वतीरस्थं स्वस्तिकं कूटमिष्यते। तान्त्राञ्जनगिरिः पश्चान्मेरोर्दक्षिणतश्च ते ॥ १५९

कुमुदं दक्षिणे तीरे पलाशं पुनरुत्तरे। सीतोदाया महानद्या अपरस्यां तु मेरुतः ॥ १६०

पश्चात्पुनश्च सीताया वतंसं कूटमिष्यते। पुरस्ताद्रोचनं नाम मेरोरुत्तरतो द्वयम् ॥ १६१

भद्रसालवने तानि समानानि काञ्चनैः। दिशागजेन्द्रनामानो देवास्तेषु वसन्ति च ॥ १६२

अपरोत्तरतो मेरोः काञ्चनो गन्धमादनः। तस्मात्पूर्वोत्तरस्यां च वैडूर्यो माल्यवान् गिरिः॥ १६३

पूर्वदक्षिणतो मेरोः सौमनस्यो हि राजतः। विद्युत्प्रभस्तापनीयो दक्षिणापरतस्ततः ॥ १६४

चतुःशतोच्छ्रया नीले निषधे च समागमे। एते पञ्चशतोच्छ्राया मेरुमाश्रित्य पर्वताः ॥ १६५

। ४०० । ५०० ।

उच्छ्रयस्य चतुर्भागमुभयान्तेऽवगाहनम्। ते पञ्चशतविस्तारा देवोत्तरकुरुश्रिताः ॥ १६६

ह्रदोंके आगे दो हजार बानवे (२०९२) योजन और दो कला जाकर नदीद्वारसे संयुक्त दक्षिण-उत्तर भद्रशाल वनकी वेदी अवस्थित है ॥ २ ॥ पूर्व-पश्चिम भागोंमें गजदंत पर्वतोंसे लगी हुई वह वेदी एक योजन ऊंची और आध योजन विस्तृत है ॥ ३ ॥

सीता नदीके उत्तर किनारेपर पद्मोत्तर कूट (पद्मकूट) और उसके दक्षिण किनारेपर नीलवान् कूट स्थित है। ये दोनों कूट मेरु पर्वतके पूर्वमें स्थित हैं ॥ १५८ ॥ सीतोदा नदीके पूर्व तटपर स्थित स्वस्तिक कूट माना जाता है। अंजन नामक पर्वत उसके पश्चिम तटपर स्थित है। ये दोनों दिग्गज पर्वत मेरु पर्वतके दक्षिणमें हैं ॥१५९॥ सीतोदा महानदीके दक्षिण तटपर कुमुद और उसके उत्तर तटपर पलाश पर्वत है। ये दोनों पर्वत मेरुके पश्चिममें हैं॥ १६०॥ सीता नदीके पश्चिम तटपर अवतंस कूट और उसके पूर्व तटपर रोचन नामक कूट स्थित है। ये दोनों कूट मेरुके उत्तरमें हैं ॥ १६१ ॥ भद्रशाल वनमें स्थित उन पर्वतोंके विस्तार आदिका प्रमाण कांचन पर्वतोंके समान है। उनके ऊपर दिग्गजेन्द्र नामक देव निवास करते हैं॥ १६२॥

मेरु पर्वतके पश्चिम-उत्तर (वायव्य) कोणमें सुवर्णमय गन्धमादन पर्वत तथा उसके पूर्वोत्तर (ईशान) कोणमें वैडूर्यमणिमय माल्यवान् पर्वत अवस्थित है ॥ १६३ ॥ मेरुके पूर्व-दक्षिण (आग्नेय) कोणमें रजतमय सौमनस्य पर्वत तथा उसके दक्षिण-पश्चिम (नैर्ऋत्य) कोणमें सुवर्णमय विद्युत्प्रभ पर्वत स्थित है ॥ १६४ ॥ ये पर्वत जहां निषध और नील पर्वतसे संबद्ध हैं वहां उनकी ऊंचाई चार सौ (४००) योजन है। किन्तु मेरुके पासमें उनकी यह ऊंचाई क्रमशः वृद्धिगत होकर पांच सौ (५००) योजन प्रमाण हो गई है ॥ १६५ ॥ उनका अवगाह दोनों ओर ऊंचाईके चतुर्थ भाग प्रमाण है। देवकुरु और उत्तरकुरुके आश्रित इन

विस्तारस्तद्वदाख्यातो द्वे शते नवसंयुते । षट्कलाश्च समाख्याताश्चतुर्णामपि भागतः ॥ १६७

३०२०९ । $\frac{६}{१६}$ ।

सिद्धायतनकूटं च गन्धमादन-कौरवे । गन्धमालिनिकूटं च लोहिताक्षमतः परम् ॥ १६८
स्फटिकानन्दकूटे च मेरोः प्रभृति तानि तु । अवगाहनतुल्यः स्यात्कूटोच्छ्रायो ऽन्ययोर्द्वयोः ॥१६९
सिद्धं च माल्यवन्नाम्ना कूटं चोत्तरकौरवम् । कच्छं सागरकं चैव रजतं पूर्णभद्रकम् ॥ १७०
सीता हरिसहं चेति माल्यवत्स्वपि लक्षयेत् । उक्त एवोच्छ्रयो ऽन्यापि नवस्वपि विभागतः ॥१७१
सिद्धं सौमनसं कूटं देवकुर्वाख्यमुत्तमम् । मङ्गलं विमलं चातः काञ्चनं च वशिष्टकम्[1] ॥ १७२
सिद्धं विद्युत्प्रभं कूटं देवकौरवपद्मकम् । तपनं स्वस्तिकं चैव शतज्वलमतः परम् ॥ १७३

पर्वतोंका विस्तार पांच सौ (५००) योजन मात्र है ॥१६६॥ इन चारों ही पर्वतोंकी लंबाईका प्रमाण तीस हजार दो सौ नौ योजन और छह कला ($३०२०९\frac{६}{१६}$) प्रमाण कहा गया है ॥ १६७ ॥ सिद्धायतनकूट, गन्धमादन, कुरु (उत्तरकुरु), गन्धमालिनी, लोहिताक्ष, स्फटिक और आनन्द-कूट; ये सात कूट मेरु पर्वतसे लेकर गन्धमादन गजदन्त पर्वतके ऊपर स्थित हैं। इनमें प्रथम और अन्तिम इन दो कूटोंकी ऊंचाईका प्रमाण दोनों ओरके अन्तिम अवगाह (१००, १२५) के बराबर है ॥ १६८-१६९ ॥

विशेषार्थ— गजदन्त पर्वतोंकी ऊंचाई मेरु पर्वतके पासमें ५०० योजन है। आगे वह क्रमसे हीन होती हुई निषध एवं नील पर्वतके समीपमें ४०० यो. मात्र रह गई है। इस ऊंचाईके अनुसार ही इनके ऊपर स्थित उन कूटोंकी भी ऊंचाई है। तदनुसार प्रथम कूटकी ऊंचाई १२५ यो. (पर्वतकी ऊंचाईके चतुर्थ भाग प्रमाण) और अन्तिम कूटकी ऊंचाई १०० यो. मात्र है। बीचके कूटोंकी ऊंचाई हीनाधिक है। उसके जाननेके लिये यह रीति काममें लायी जाती है- पर्वतके दोनों ओरकी अन्तिम ऊंचाईके प्रमाणको परस्पर घटानेपर जो शेष रहे उसमें एक कम गच्छ (९ व ७) का भाग दे। इस प्रकारसे जो लब्ध हो वह हानिके चयका प्रमाण होता है। इसको एक कम अभीष्ट कूटकी संख्यासे गुणित करके प्राप्त राशिको मुखमें मिला देनेपर विवक्षित कूटकी ऊंचाईका प्रमाण होता है। जैसे आठवें कूटकी ऊंचाईका प्रमाण— $(१२५-१००) \div (९-१) = ३\frac{१}{८}$ हानिचय; $३\frac{१}{८} \times (८-१) + १०० = १२१\frac{५}{८}$ योजन।

सिद्ध, माल्यवान्, उत्तरकुरु, कच्छ, सागर, रजत, पूर्णभद्र, सीता और हरिसह कूट; ये नौ कूट माल्यवान् गजदन्त पर्वतके ऊपर स्थित जानना चाहिये। इन नौ कूटोंकी ऊंचाईका विभाग पूर्वोक्त क्रमसे यहां भी जानना चाहिये ॥ १७०-१७१ ॥ सिद्ध, सौमनस, देवकुरु, मंगल, विमल, कांचन और अवशिष्ट; ये सात कूट सौमनस गजदन्तके ऊपर अवस्थित हैं ॥१७२॥ सिद्ध, विद्युत्प्रभ, देवकुरु, पद्म, तपन, स्वस्तिक, शतज्वल, सीतोदाकूट और हरिसम नामक कूट;

---

१ आ प विशिष्ठकम् ।

सीतोदाप्रभूतायां कूटं हरिसहाह्वयम् । विद्युत्प्रभेषु सर्वेषु त्वेवमेतानि[1] वाचकैः ॥ १७४
उभयोरप्यनन्तरकूटेषु तेषां देव्यो हसन्तिकाः । दिक्कुमार्यश्च मध्येषु वसन्त्यायतनेषु ॥ १७५
भोगंकरा भोगवती सुभोगा भोगमालिनी । वत्समित्रा सुमित्रा च वारिषेणा बलेति ताः ॥ १७६
उक्तं च द्वयम् – [ति. प. ४,२१३६–३७.]
मेरुगिरिपुव्वदक्खिणपच्छिमभे उत्तरम्मि[2] पत्तेक्कं । सीदासीदोदाये पंच ह्रदा केइ इच्छंति ॥४
तीणं उवदेसेण य एक्केक्कदहस्स दोसु तीरेसु । पण पण कंचणसेला पत्तेक्कं होंति णियमेण ॥५
चित्रकूटः पद्मकूटो नलिनश्चैकशैलकः । शैलाः पूर्वविदेहेषु सीतानीलान्तरायताः ॥ १७७
त्रिकूटो निषधं प्राप्तस्तथा वैश्रवणाञ्जनौ । आत्माञ्जनश्च पूर्वाद्याः सीतां प्राप्य प्रतिष्ठिताः[3] ॥१७८
श्रद्धावान् विजटावांश्च आशीविषसुखावहौ । अपरेषु विदेहेषु सीतोदानिषधाश्रिताः ॥ १७९
नीलसीतोदयोर्मध्ये चन्द्रमालो गिरि[:]स्थितः । सूर्यमालो नागमालो देवमालश्च नामभिः ॥ १८०
नदीतटेषु तुङ्गिद्धाः शतानि खलु पञ्च ते । गजदन्तसमाशेषवर्णनाः परिकीर्तिताः ॥ १८१

इस प्रकार ये नौ कूट विद्युत्प्रभ गजदन्तके ऊपर अवस्थित हैं ॥ १७३–१७४॥ उनके दोनों ओरके अन्तिम कूटोंपर अनन्तर कहीं जानेवाली व्यन्तर देवियां तथा मध्यमें स्थित कूटोंपर स्थित क्रीडागृहोंमें दिक्कुमारियां निवास करती हैं । इन उपर्युक्त देवियोंके नाम ये हैं– भोगंकरा, भोगवती, सुभोगा, भोगमालिनी, वत्समित्रा, सुमित्रा, वारिषेणा और बला ॥१७५–१७६॥ यहां दो गाथायें कही गई हैं—

मेरु पर्वतके पूर्व, दक्षिण, पश्चिम और उत्तर इनमेंसे प्रत्येक दिशामें सीता और सीतोदा नदियोंके आश्रित पांच द्रह हैं, ऐसा कितने ही आचार्य मानते है । उनके उपदेशके अनुसार प्रत्येक द्रहके दोनों किनारोंपर नियमसे पांच पांच कांचन पर्वत स्थित हैं ॥४–५ ॥

चित्रकूट, पद्मकूट, नलिनकूट और एकशैल वे गजदन्त पर्वत पूर्वविदेहोंमें सीता महानदी और नील पर्वतके बीचमें लंबायमान हैं । निषध पर्वतको प्राप्त त्रिकूट, वैश्रवण, अंजन और आत्मांजन; ये गजदन्त पर्वत पूर्वादिक्रमसे सीता महानदीको प्राप्त होकर प्रतिष्ठित हैं । अभिप्राय यह है कि उपर्युक्त आठ गतदन्त पर्वत प्रदक्षिणक्रमसे पूर्व विदेहक्षेत्रोंमें अवस्थित हैं ॥ १७७–१७८॥ श्रद्धावान्, विजटावान्, आशीविष और सुखावह; ये गजदन्त पर्वत सीतोदा महानदी और निषध पर्वतके आश्रित होकर अपर विदेहक्षेत्रोंमें अवस्थित है । नील पर्वत और सीतोदाके मध्यमें चन्द्रमाल पर्वत स्थित है । इसी प्रकारसे सूर्यमाल, नागमाल और देवमाल नामक गजदन्त पर्वत भी वहां अवस्थित हैं ॥ १७९–१८० ॥ इनकी ऊंचाई नदीतटके ऊपर पांचसौ योजन प्रमाण है । उनका समस्त वर्णन गन्धमादनादि गजदन्त पर्वतोंके समान बतलाया

---

१ ब त्वेवमेतानि । २ ब उत्तरस्मिं । ३ ब सीतां प्रतिष्ठिताः ।

षोडशैव सहस्राणि षट्कोनशतानि षट् । द्वे कले चायता एते ऋषुकूटास्तथैकशः ॥ १८२
। १६[६]५९२ । २ ।

पर्वताश्रितकूटेषु दिशाकन्या वसन्ति हि । नद्याश्रितेषु कूटेषु अर्हदायतनानि च ॥ १८३
मध्यमेष्वथ कूटेषु व्यन्तराक्रीडनालयाः । अनुपर्वतमायामाः कूटानां गदितो बुधैः ॥ १८४
द्वाविंशतिसहस्राणि भद्रशालवनं स्मृतम् । मेरोः पूर्वापरं सार्धशते[1] द्वे दक्षिणोत्तरम् ॥ १८५
गव्यूतिमवगाढाश्च गव्यूतिद्वयविस्तृताः । वेदिका योजनोत्सेधा वनात्पूर्वापरस्थिताः ॥१८६
नदी ग्राहवती नीलात्प्रच्युता ह्रदवत्यपि । सीतां पङ्कवती चेति वक्षारान्तरसंस्थिताः ॥१८७
पूर्वास्तप्तजला नाम्ना[2] तस्या मत्तजला परा । तस्या उन्मत्तजला चेति सीतां निषधपर्वतात् ॥ १८८
क्षारोदा[3] निषधादेव सीतोदा च विनिर्गता । स्रोतोन्तर्वाहिनी चेति सीतोदां प्रविशन्ति ताः ॥१८९
अपरेषु विदेहेषु वपराद् गन्धमालिनी । फेनमालिनिका नीलाद्ऊर्मिमालिन्यपि स्मृताः ॥ १९०
एता विभङ्गनद्याख्या रोहित्सदृशवर्णनाः । दिशाकन्या वसन्त्यासां संगमे तोरणालये ॥ १९१
विष्कम्भो मुखे १२½ । प्रवेशे १२५ ।

गया है ॥ १८१ ॥ ये पर्वत सोलह हजार व आठ कम छह सौ अर्थात् सोलह हजार पांच सौ बानबे योजन और दो कला (१६५९२$\frac{२}{६}$) प्रमाण लंबे है । इनमेंसे प्रत्येकके ऊपर चार कूट अवस्थित हैं ॥ १८२ ॥ इनमेंसे जो कूट पर्वतके आश्रित हैं उनके ऊपर दिक्कन्यायें निवास करती हैं, तथा जो कूट नदीके आश्रित हैं उनके ऊपर जिनभवन स्थित हैं ॥ १८३ ॥ मध्यके कूटोंपर व्यन्तर देवोंके क्रीडागृह हैं। इनका आयाम गणधरादिकोंके द्वारा पर्वतके आयामके अनुसार कहा गया है ॥ १८४ ॥

भद्रशाल वनका विस्तार मेरुके पूर्व-पश्चिममें बाईस हजार (२२०००) योजन और उसके दक्षिण-उत्तरमें अढाई सौ योजन प्रमाण है ॥ १८५ ॥ भद्रशाल वनके पूर्व और पश्चिममें जो वेदिकायें स्थित हैं उनका अवगाह एक कोस, विस्तार दो कोस, तथा ऊंचाई एक योजन प्रमाण है ॥ १८६ ॥

ग्राहवती, ह्रदवती और पंकवती ये विभंगा नदियां नील पर्वतसे निकलकर सीता महानदीको प्राप्त हुई हैं। इनका अवस्थान वक्षारोंके मध्यमें है ॥१८७॥पूर्वकी ओरसे तप्तजला नामक दूसरी मत्तजला और तीसरी उन्मत्तजला ये तीन विभगा नदियां निषध पर्वतसे निकलकर सीता महानदीको प्राप्त हुई हैं ॥ १८८ ॥ क्षारोदा, सीतोदा और स्रोतोवाहिनी ये तीन विभंगा नदियां निषध पर्वतसे ही निकलकर सीतोदा महानदीमें प्रवेश करती हैं ॥१८९॥ गन्धमालिनी, फेनमालिनी, और ऊर्मिमालिनी नामक ये तीन विभंगा नदियां पश्चिमकी ओरसे अपर विदेहोंमें स्थित होती हुई नील पर्वतसे निकलकर सीतोदा महानदीको प्राप्त हुई हैं ॥१९०॥ये उपर्युक्त बारह नदियां विभंगा

---

१ प सार्ध शते । २ आ प जलान्नाम्ना । ३ प क्षीरोदा ।

कच्छा सुकच्छा महाकच्छा चतुर्थी कच्छकावती । आवर्ता लाङ्गलावर्ता पुष्कला पुष्कलावती ॥ १९२
अपराद्या पूर्वे सीता विजयाश्चक्रवर्तिनाम् । नीलवतीं च संप्राप्ताः प्रादक्षिण्येन भाषिताः[1] ॥ १९३
वत्सा सुवत्सा महावत्सा चतुर्थी वत्सकावती । रम्या सुरम्या रमणीयाष्टमी मङ्गलावती ॥ १९४
पद्मा सुपद्मा महापद्मा चतुर्थी पद्मकावती । शङ्खा च नलिना चैव कुमुदा सरिता अपि च ॥ १९५
वप्रा सुवप्रा महावप्रा चतुर्थी वप्रकावती । गन्धा खलु सुगन्धा च गन्धिला गन्धमालिनी ॥ १९६
सीतानिषधयोर्मध्ये वत्साद्या परिकीर्तिताः । पद्माद्या निषधासन्ना वप्राद्या नीलमाश्रिताः ॥ १९७
द्वे सहस्रे शते द्वे च वेशोनाश्च त्रयोदश । पूर्वापरेण विष्कम्भो दैर्घ्यं वक्षारसंमितम् ॥ १९८

। २२१२ । ६ ।

द्वात्रिंशद्विजयार्धाश्च तेषां मध्येषु तत्समाः । भारतेन समा मानैर्नवकूटविभूषिताः ॥ १९९
एकतः पञ्चपञ्चाशच्छ्रेण्योः स्युर्नगराणि च । नित्यं विद्याधराश्चैषु परयोर्द्वीपयोस्तथा ॥ २००

नदीके नामसे प्रसिद्ध है । इनका वर्णन रोहित् नदीके समान है । इनके संगमस्थानमें स्थित तोरणोंके ऊपर जो प्रासाद स्थित है उनमें दिक्कन्यायें निवास करती है ॥१९१॥ इनका विस्तार मुखमें १२½ और प्रवेशमें १२५ योजन है ।

कच्छा, सुकच्छा, महाकच्छा, कच्छकावती, आवर्ता, लांगलावर्ता, पुष्कला और पुष्कलावती; ये पश्चिमको आदि लेकर प्रदक्षिणक्रमसे स्थित चक्रवर्तियोके विजय नील पर्वत और सीता नदीको प्राप्त है, ऐसा निर्दिष्ट किया गया है ॥ १९२–१९३ ॥ वत्सा, सुवत्सा, महावत्सा, चतुर्थ वत्सकावती, रम्या, सुरम्या, आठवीं रमणीया, मंगलावती, पद्मा, सुपद्मा, महापद्मा, पद्मकावती, शखा, नलिना, कुमुदा, सरिता, वप्रा, सुवप्रा, महावप्रा, वप्रकावती, गन्धा, सुगन्धा, गन्धिला और गन्धमालिनी; इनमें वत्सा आदि विजय सीता नदी और निषध पर्वतके मध्यमें कहे गये हैं । पद्मा आदिक देश निषध पर्वतके समीपमें तथा वप्रा आदिक देश नील पर्वतके आश्रित है ॥ १९४–१९७ ॥ इनके पूर्वापर विस्तारका प्रमाण कुछ कम दो हजार दो सौ तेरह (२२१२$\frac{७}{१९}$) योजन है । लंबाई उनकी वक्षार पर्वतोके बराबर (१६५९२$\frac{३}{१९}$ यो.) है ॥ १९८ ॥

उन क्षेत्रोके मध्य भागमें क्षेत्रविस्तारके समान लंबे (२२१२$\frac{७}{१९}$) बत्तीस विजयार्ध पर्वत स्थित हैं । नौ कूटोंसे विभूषित ये विजयार्ध पर्वत प्रमाणमें भरतक्षेत्रस्थ विजयार्धके समान हैं ॥ १९९ ॥ इनमेंसे प्रत्येकके ऊपर दो श्रेणियोंमें पचवन पचवन नगरियां है जहां नित्य ही विद्याधरोंका निवास है । इसी प्रकार आगेके दो द्वीपों (धातकीखण्ड और पुष्करार्ध) में भी संभावना चाहिये ॥ २०० ॥

---

१ ब भाषिताः ।

क्षेमा क्षेमपुरी नाम्नाऽरिष्टारिष्टपुरी तथा । खड्गा पुनश्च मञ्जूषा स्योषधी पुण्डरीकिणी ॥२०१
राजधान्य इमा ज्ञेयाः सीतायाः उत्तरे तटे । दक्षिणे तु सुसीमा च कुण्डला चापराजिता ॥ २०२
प्रभंकरा चतुर्थी स्यात्पञ्चम्यङ्कावती पुरी । पद्मावती शुभेत्यन्या चाष्टमी रत्नसंचया ॥ २०३
अश्वसिंहमहापुर्यो विजया च पुरी पुनः । अरजा विरजाऽशोका वीतशोकेति चाष्टमी ॥२०४
विजया वैजयन्ती च जयन्त्यन्यापराजिता । चक्रा खड्गा त्वयोध्या च अवध्या[1] सीतरे तटे॥२०५
दक्षिणोत्तरतो ह्येता नगर्यो द्वादशायताः । नवयोजनविस्तीर्णा हैमप्राकारसंवृताः ॥ २०६
युक्ता[2] द्वारसहस्रेण तदर्धेरपि चाल्पकैः । सप्तभिश्च शतैर्वज्रै रत्नचित्रकवाटकैः ॥ २०७
सहस्रं च चतुष्काणां रम्या द्वादशसंगुणाः । एतासामक्षयाश्चैता नगर्यो नाऽन्यनिर्मिताः[3] ॥२०८
गङ्गा सिन्धुश्च विजये प्रसूते नीलपर्वतात् । विजयार्धगुहातीते सीतां प्रविशतश्च[4] ते ॥२०९
उपर्युक्त प्रकारसे जो भरतक्षेत्रका तीन स्थानोंमें विस्तार बतलाया गया है उससे विदेह पर्यंत हैमवत आदि क्षेत्रोंमें उत्तरोत्तर चौगुणी वृद्धि हुई है। विदेहसे आगेके क्षेत्रोंके विस्तारमें उसी क्रमसे हानि होती गई है ॥ ६५ ॥ हैमवत क्षेत्रका अ. विस्तार १६६३१९$\frac{५६}{२००}$ म. वि. २१४०५१$\frac{१६०}{२००}$, बा. वि. २६१७८४$\frac{५२}{२००}$ । हरिवर्ष अ. वि. ६६५२७७$\frac{१२}{२००}$, म. वि. ८५६२०७$\frac{४}{२००}$, बा. वि. १०४७१३६$\frac{२०८}{२००}$ । विदेह अ. वि. २६६११०८$\frac{४८}{२००}$, म. वि. ३४२४८२८$\frac{१६}{२००}$, बा. वि. ४१८८५४७$\frac{१६}{२००}$ ।

पुष्कर द्वीपके बीचमें जो मानुषोत्तर नामक सुवर्णमय उत्तम पर्वत स्थित है वह कोटके घेरेके समान है ॥ ६६ ॥ वह पर्वत सत्तरह सौ इक्कीस (१७२१) योजन ऊंचा है। उसका अभ्यन्तर तट टांकीसे छेदे गयेके समान और बाह्य पार्श्वभाग क्रमसे ऊंचा है ॥ ६७ ॥ इस

---

१ ब नवनवतिशतं । २ प मण्डले । ३ प 'शतं सप्तदश' इत्यादिश्लोको नास्ति ।

मूले सहस्रं द्वाविंशं चतुर्विंशं चतुःशतम् । अग्रे मध्ये च विस्तारस्त[द्]द्वयार्धमिति[1] स्मृतः ॥ ६८

। ७२३ ।

त्रीण्येकं सप्तषट्त्रीणि द्वे चत्वार्येकमं भवेत् । साधिकं च परिक्षेपो मानुषोत्तरपर्वते ॥ ६९

। १४२३६७१३ ।

सहस्रं त्रिशतं त्रिंशद्दण्डाः स्युर्हस्त एककः । दशाङ्गुलानि पञ्चैव जवाश्चाधिकमानकम् ॥ ७०

। ह १ अं १० ज ५ ।

अर्धयोजनमुद्विद्धा पादगोरुतविस्तृता । वेदिका शिखरे तस्य चतुर्दशगुहश्च सः ॥ ७१

। दं २५०० ।

चतुर्दश महानद्यो बाह्या गत्वार्धपुष्करे । गुहासु पुष्करोदं च गताः कालोदकं पराः ॥ ७२

त्रीणि त्रीणि तु कूटानि प्रत्येकं दिक्चतुष्टये । पूर्वयोर्विदिशोश्चैव तान्यष्टादश पर्वते ॥ ७३

सर्वेषु तेषु कूटेषु गरुडेन्द्रपुराणि[2] तु । गिरिकन्याकुमाराश्च वसन्ति गरुडान्वयाः ॥ ७४

षडग्नीशानकूटेषु सुपर्णकुलसंभवाः । कुमाराः शेषकूटेषु दिक्कुमार्यो वसन्ति च ॥ ७५

तस्य दिक्ष्वपि चत्वारि यर्हदायतनानि[3] हि । नैषधैः सममानानि इष्वाकारगिरिष्वपि ॥ ७६

पर्वतका विस्तार मूलमें एक हजार बाईस (१०२२) योजन, ऊपर शिखरपर चार सौ चौबीस (४२४) योजन और मध्यमें उन दोनोंके अर्धभाग अर्थात् सात सौ तेईस (१०२२+४२४ = ७२३) योजन प्रमाण माना गया है ॥ ६८ ॥ मानुषोत्तर पर्वतकी परिधि अंकक्रमसे तीन, एक, सात, छह, तीन, दो, चार और एक (१४२३६७१३) इतने योजनसे कुछ अधिक है ॥ ६९ ॥ परिधिकी इस अधिकताका प्रमाण एक हजार तीन सौ तीस धनुष, एक हाथ, दस अंगुल और पांच जौ है– दण्ड १३३०, हाथ १, अंगुल १०, जौ ५ ॥ ७० ॥ इस पर्वतके शिखरपर जो वेदिका स्थित है वह आधा योजन ऊंची और पाव कोससे सहित एक कोस (दण्ड २५००) विस्तृत है । यह पर्वत चौदह गुफाओंसे संयुक्त है ॥ ७१ ॥ पुष्करार्ध द्वीपमें स्थित बाह्य चौदह नदियाँ इन गुफाओंमेंसे जाकर पुष्करोद समुद्रको प्राप्त हुई हैं और शेष चौदह नदियाँ कालोदक समुद्रको प्राप्त हुई हैं ॥ ७२ ॥

इस पर्वतके ऊपर चारों दिशाओंमेंसे प्रत्येक दिशामें तीन तीन तथा पूर्व दो विदिशाओं (ईशान व आग्नेय) में भी तीन तीन कूट स्थित हैं । इस प्रकार उसके ऊपर सब अठारह (१८) कूट स्थित हैं ॥ ७३ ॥ उन सब कूटोंके ऊपर गरुडेन्द्रके नगर हैं जिनमें गरुड-वंशीय गिरिकन्यायें और गिरिकुमार रहते हैं ॥७४॥ उनमेंसे अग्नि और ईशान कोणके कूटोंपर सुपर्ण (गरुड) कुलमें उत्पन्न हुए कुमार (सुपर्णकुमार) तथा शेष कूटोंके ऊपर दिक्कुमारियां रहती हैं ॥ ७५ ॥ उक्त पर्वतकी चारों दिशाओंमें चार अर्हदायतन (जिनभवन) स्थित हैं जो

---

१ ब तद्वयोर्धमिति । २ प गरुणेन्द्र° । ३ आ प चत्वारिर्ह्यर्दा° ।

विविधरत्नमयानतिभासुरान्
सुरसहस्रनुताचितरक्षितान् ।
जिनगृहान् द्विकहीनचतुःशता-
नभिनमामि[1] नरक्षितिसंस्थितान् ॥ ७७

इति लोकविभागे मानुषक्षेत्रविभागो नाम तृतीयं प्रकरणं समाप्तम् ॥ ३ ॥

विस्तारादिमें निषध पर्वतके ऊपर स्थित जिनभवनोंके समान हैं। इसी प्रकारके जिनभवन इष्वाकार पर्वतोंके ऊपर भी स्थित हैं ॥ ७६ ॥

मध्य लोकमें जो अनेक प्रकारके रत्नमय जिनभवन स्थित हैं वे अतिशय देदीप्यमान होते हुए हजारों देवोंके द्वारा नमस्कृत, पूजित एवं रक्षित हैं। उन सबकी संख्या दो कम चार सौ (३९८) है। उन सबको मैं नमस्कार करता हूं ॥ ७७ ॥

इस प्रकार लोकविभागमें मानुषक्षेत्र विभाग नामक तृतीय प्रकरण समाप्त हुआ ॥३॥

१ ब शतारभिनमामि

[चतुर्थो विभागः]

जम्बूद्वीपः समुद्रश्च [1]लावणस्तस्य बाहिरः । द्वीपश्च धातकीखण्डः[2] कालोदः पुष्करस्तथा ॥ १
पुष्करं परिवृत्यास्थात्[3] पुष्करोदस्तु सागरः । वारुणीवरनामा च द्वीपस्तन्नामसागरः ॥ २
ततः क्षीरवरो द्वीपः सागरश्च तदाह्वयः । ततो घृतवरो द्वीपो घृतोदश्चापि सागरः ॥ ३
ततः क्षौद्रवरो द्वीपस्तन्नामैव च सागरः । नन्दीश्वरस्ततो द्वीपः सागरश्च तदाह्वयः[4] ॥ ४
अरुणो नामतो द्वीपोऽरुणाभासवरश्च सः । कुण्डलो नामतो द्वीपस्ततः शङ्खवरोऽपि च ॥ ५
रुचकोऽतः परो द्वीपो भुजगोऽपि च नामतः । द्वीपः कुशवरो नाम्ना ततः क्रौञ्चवरोऽपि च ॥ ६
जम्बूद्वीपादयो द्वीपा नामतः षोडशोदिताः । द्वीपनामान एव स्युः पुष्करोदादिसागराः[5] ॥ ७
असंख्येयांस्ततोऽतीत्य द्वीपो नाम्ना मनःशिलः । हरितालश्च सिन्दूरः[6] श्यामकोऽञ्जन एव च ॥८
द्वीपो हिङ्गुलिकाह्वश्च तस्माद् रूप्यवरः परः । सुवर्णवर इत्यन्यस्ततो वज्रवरोऽपि च ॥ ९
वैडूर्यवरसंज्ञश्च ततो नागवरोऽपि च । ततो भूतवरो[7] द्वीपस्ततो यक्षवरः परः ॥ १०
ततो देववरो द्वीपस्ततोऽहीन्द्रवरः परः । स्वयंभूरमणश्चान्त्यः सागरास्तत्सनामकाः[8] ॥११
षोडशैते बहिर्द्वीपा भाषिता नामभिर्जिनैः । असंख्येयाश्च मध्यस्थाः शुभाख्या द्वीपसागराः ॥ १२

सब द्वीपोंके मध्यमें जंबूद्वीप है और उसके बाह्य भागमें लवण समुद्र है । उसके आगे धातकीखण्ड द्वीप व कालोदक समुद्र है । तत्पश्चात् पुष्करद्वीप और उसके आगे पुष्करद्वीपको घेरकर पुष्करोद समुद्र स्थित है। इसके आगे वारुणीवर द्वीप और उसीके नामका समुद्र, क्षीरवर द्वीप और उसीके नामका समुद्र, उसके आगे घृतवर द्वीप, घृतवर समुद्र, क्षौद्रवर द्वीप, क्षौद्रवर समुद्र, नन्दीश्वर द्वीप, नन्दीश्वर समुद्र, इसके आगे अपने [अपने नामवाले समुद्रोंसे संयुक्त] अरुण द्वीप, अरुणाभासवर द्वीप, कुण्डल द्वीप, शंखवर द्वीप, रुचक द्वीप, भुजग द्वीप, कुशवर द्वीप और क्रौंचवर द्वीप; इस प्रकार जंबूद्वीप आदि नामोंसे प्रसिद्ध ये सोलह (१६) द्वीप कहे गये हैं । पुष्करोद समुद्रको आदि लेकर आगेके सब समुद्र अपने अपने द्वीप जैसे नामवाले हैं ॥१-७॥

इसके आगे असंख्यात द्वीप-समुद्रोंको लांघकर मनःशिल नामक द्वीप स्थित है । उसके आगे क्रमशः हरिताल, सिन्दूर, श्यामक, अंजन, हिंगुलिक, रूप्यवर, सुवर्णवर, वज्रवर, वैडूर्यवर, नागवर, भूतवर, यक्षवर, देववर, अहीन्द्रवर और अन्तिम स्वयम्भूरमण द्वीप; इस प्रकार ये सोलह (१६) द्वीप अपने अपने नामवाले सोलह समुद्रोंसे संयुक्त होते हुए बाह्य भागमें स्थित हैं । जिन भगवान्ने इन्हें इन नामोंसे कहा है । क्रौंचवर समुद्र और मनःशिल द्वीपके मध्यमें स्थित जो असंख्यात द्वीप-समुद्र हैं वे भी उत्तम नामोंवाले हैं ॥ ८–१२ ॥

---

१ प लवणा° । २ आ ब षण्डः । ३ प वृत्यास्स्यात् । ४ आ ब तदाह्वकः । ५ प सागरः । ६ आ प सिंधूरः । ७ आ प °वरौ । ८ प °स्तत्तनामकाः ।

वारुणीलवणस्वादौ घृतक्षीररसावपि । असामान्यरसा एते कालान्त्यौ केवलोदकौ ॥ १३
मधुमिश्रजलास्वादस्तृतीयः पुष्करोदकः । शेषा इक्षुरसास्वादा असंख्येया[1] महार्णवाः ॥ १४

उक्तं च त्रिलोकसारे [३१९]—

लवणं वारुणितियमिदि कालदुगंतिमसयंभुरमणमिदि । पत्तेयजलसुवादा अवसेसा होंति उच्छुरसा ॥
लवणाब्धौ[2] च कालोदे स्वयंभूरमणोदधौ । जीवा जलचराः सन्ति न च शेषेषु वार्धिषु ॥ १५
[3]व्यतीतद्वीपवार्धिभ्यो विस्तारे चक्रवालके । एकेन नियुतेनैको द्वीपोऽब्धिर्वातिरिच्यते ॥ १६
मन्दरार्धाद् गता[4] रज्जुरर्धा प्राप्तान्त्यवारिधेः । अन्तं तदर्धमस्यान्तस्तथा द्वीपेऽर्णवेऽपरे ॥ १७
आद्यार्धितार्धरज्जुश्च स्वयंभूरमणोदधेः । तटात्परं सहस्राणां गत्वाऽस्यात्पङ्कसप्ततिम् ॥ १८

। ७५००० ।

वारुणीवर, लवणोद, घृतवर और क्षीरवर ये चार समुद्र स्वादमें असामान्य रस अर्थात् अपने अपने नामोंके अनुसार रसवाले हैं । कालोदक समुद्र और अन्तिम स्वयम्भूरमण समुद्र ये दो समुद्र केवल जलके स्वादवाले हैं। तीसरा पुष्करोदक समुद्र मधुमिश्रित जलके स्वादसे संयुक्त, तथा शेष असंख्यात समुद्र इक्षुरसके समान स्वादवाले हैं ॥ १३–१४ ॥ त्रिलोकसारमें भी कहा है —

लवणसमुद्र और वारुणीत्रिक अर्थात् वारुणीवर, क्षीरवर और घृतवर ये तीन समुद्र प्रत्येकजलस्वाद अर्थात् अपने अपने नामके अनुसार स्वादवाले हैं । कालोदक और पुष्करवर ये दो तथा अन्तिम स्वयम्भूरमण ये तीन समुद्र सामान्य जलके स्वादसे संयुक्त हैं। शेष सब समुद्रोंका स्वाद इक्षुरसके समान है ॥ १ ॥

लवणसमुद्र, कालोदक और स्वयम्भूरमण समुद्रमें जलचर जीव हैं । शेष समुद्रोंमें जलचर जीव नहीं हैं ॥ १५ ॥ मण्डलाकार विस्तारमें विगत द्वीप-समुद्रोंके विस्तारकी अपेक्षा आगेके द्वीप अथवा समुद्रका विस्तार एक लाख योजनसे अधिक होता है ॥ १६ ॥

उदाहरण— जैसे जंबूद्वीप, लवणसमुद्र, धातकीखण्ड और कालोदक समुद्र इन विगत द्वीप-समुद्रोंका विस्तार १५ लाख योजन प्रमाण (१+२+४+८=१५ लाख) है, अत एव आगेके पुष्कर द्वीपका विस्तार इससे एक लाख योजनसे अधिक होकर सोलह (१६) लाख योजन प्रमाण होगा ।

मन्दर पर्वतके अर्ध (मध्य) भागसे गई हुई अर्ध राजु अन्तिम (स्वयम्भूरमण) समुद्रके अन्त भागको प्राप्त हुई है । उसका (अर्ध राजुका) आधा भाग इसी समुद्रके भीतर [अभ्यन्तर तटसे ७५००० यो. आगे जाकर] प्राप्त होता है। यही क्रम पिछले द्वीप और समुद्रमें समझना चाहिये ॥१७॥ प्रथम वार अर्धित अर्ध राजुका आधा भाग स्वयम्भूरमण समुद्रके अभ्यन्तर तटसे

---

१ प असंख्येयः । २ आ प लवणाब्धौ । ३ प व्यतीत्य° । ४ प मन्दार्धागता ।

स्वद्विभागयुतामस्थात्सहस्राणां पञ्चसप्ततिम् । खण्डिता सा तटाद् गत्वा द्वीपस्यापरस्य च ॥१९
। ११२५०० ।

स्वद्व्यंशपादसंयुक्तं पञ्चसप्ततिसहस्रकम् । पश्चिमाब्धेस्तटाद् गत्वा खण्डिता सा पुनः स्थिता ॥
। १३१२५० ।

अभ्यन्तरतटादेवमात्मार्धाङ्घ्रयष्टमादिभिः । युतां तावत्सहस्राणां गत्वास्थात् पञ्चसप्ततिम् ॥२१
। १४०६२५ । इत्यादि ।

सूच्यङ्गुलस्य संख्यातरूपयुक्छेदमानकाः । यावद् द्वीपार्णवा यन्ति ततोऽस्थात् सार्धलक्षकम् ॥२२
। १५०००० ।

पतितौ लवणे च्छेदौ[1] द्वौ[2] चैको भरतान्त्यके । निषधे चैकच्छेदो[3] द्वौ छेदौ च कुरुष्वपि ॥ २३

आगे पचत्तर हजार (७५०००) योजन जाकर स्थित हुआ है ॥१८॥ उसका भी अर्ध भाग स्वयम्भूरमण द्वीपके अभ्यन्तर तट (वेदिका) से आगे अपने द्वितीय भागसे सहित पचत्तर हजार अर्थात् एक लाख साढ़े बारह हजार ($७५००० + \frac{७५०००}{२} - ११२५००$) योजन जाकर स्थित हुआ है॥१९॥ उसका अर्ध भाग पिछले समुद्रके अभ्यन्तर तटसे आगे अपने द्वितीय भाग और चतुर्थ भागसे सहित पचत्तर हजार अर्थात् एक लाख इकतीस हजार दो सौ पचास ($७५००० + \frac{७५०००}{२} + \frac{७५०००}{४} = १३१२५०$) योजन जाकर स्थित हुआ है ॥ २० ॥ इसी प्रकारसे उत्तरोत्तर अर्धित राजुका अर्ध भाग यथाक्रमसे पिछले द्वीप-समुद्रोंकी अभ्यन्तर वेदिकासे आगे अपने अर्ध (द्वितीय), पाद (चतुर्थ) और आठवें आदि भागोंसे सहित पचत्तर हजार (यथा $-७५००० + \frac{७५०००}{२} + \frac{७५०००}{४} + \frac{७५०००}{८} = १४०६२५$ इत्यादि) योजन जाकर स्थित हुआ है ॥ २१ ॥ इस प्रकार संख्यात अंकोंसे संयुक्त सूच्यंगुलके अर्धच्छेद प्रमाण द्वीप-समुद्रों तक उपर्युक्त क्रमसे राजुके अर्धच्छेद द्वीप-समुद्रमें पड़ते जाते है । तत्पश्चात् लवणसमुद्र तक शेष सब द्वीप-समुद्रोंमें वे डेढ़ लाख (जैसे – ६४ लाख, ३२ लाख, १६ लाख और ८ लाख) के क्रमसे गिरते है ॥ २२ ॥ लवण समुद्रमें दो अर्धच्छेद, भरतक्षेत्रके अन्तमें एक, निषध पर्वतपर एक, और दो अर्धच्छेद कुरुक्षेत्रमें भी पड़े हैं (?) ॥ २३ ॥

विशेषार्थ– वृत्ताकार समस्त मध्यलोकका विस्तार एक राजु प्रमाण माना गया है। वह मेरु पर्वतके मध्य भागसे स्वयम्भूरमण समुद्र तक आधा राजु एक ओर तथा उसी मेरुके मध्य भागसे स्वयम्भूरमण समुद्र तक आधा राजु दूसरी ओर है। इस अर्ध राजुके यदि उत्तरोत्तर अर्धच्छेद किये जावें तो उनके पड़नेका क्रम इस प्रकार होगा– राजुको आधा करनेपर उसका वह अर्ध भाग मेरुके मध्य भागसे लेकर अन्तिम स्वयम्भूरमण समुद्रके अन्तमें जाकर पड़ता है। फिर उसका (अर्ध राजुका) आधा भाग इसी स्वयम्भूरमण समुद्रकी अभ्यन्तर वेदिकासे आगे ७५००० योजन जाकर इसी समुद्रके भीतर पड़ता है। इसका कारण यह है कि इस वृत्ताकार मध्य लोकके विस्तारमें पिछले समस्त द्वीप-समुद्रोंके विस्तारकी अपेक्षा आगेके द्वीप

---

१ आ प लवणे छेदौ । २ ब 'द्वौ'नास्ति । ३ प छेदौ ।

द्वीपस्य प्रथमस्यास्य व्यन्तरोऽनादरः प्रभुः । सुस्थिरो लवणस्यापि प्रभासप्रियदर्शनौ ॥ २४
कालश्चैव महाकालः कालोदे दक्षिणोत्तरौ । पद्मश्च पुण्डरीकश्च पुष्करार्धिपती सुरौ ॥ २५
चक्षुष्मांश्च सुचक्षुश्च मानुषोत्तरपर्वते । द्वौ द्वावेवं सुरौ वेद्यौ द्वीपे तत्सागरेऽपि च ॥ २६
श्रीप्रभश्रीधरौ देवौ वरुणो वरुणप्रभः । मध्यश्च मध्यमश्चोभौ वारुणीवरसागरे ॥ २७

अथवा समुद्रका विस्तार एक लाख योजनसे अधिक होता गया है (देखिये पीछे श्लोक १६)। उदाहरणके लिये यदि हम कल्पना करें कि अन्तिम स्वयम्भूरमण समुद्रका विस्तार ३२ लाख योजन है तो फिर समस्त द्वीप-समुद्रोंका विस्तार निम्न प्रकार होगा – ५०००० (अर्ध जंबू-द्वीप) + २ लाख + ४ लाख + ८ लाख + १६ लाख + ३२ लाख यो. = ६२५०००० यो.। यह मेरुके मध्य भागसे लेकर एक ओरके समस्त मध्य लोकका कल्पित अर्ध राजु प्रमाण विस्तार हुआ। अब यदि हम इसका अर्ध भाग करते हैं तो वह $\frac{६२५०००००}{२}$ = ३१२५००० यो. (राजुका दूसरा अर्ध भाग) होता है। अब चूँकि स्वयम्भूरमण समुद्रसे पूर्वके सब द्वीप-समुद्रोंका उक्त कल्पित विस्तार ५०००० + २ लाख + ४ लाख + ८ लाख + १६ लाख = ३०५०००० यो. ही है, अत एव यह राजुका दूजरा अर्ध भाग स्वयम्भूरमण समुद्रके पूर्ववर्ती स्वयम्भूरमण द्वीपमे नही पड़ता है, किन्तु वह स्वयम्भूरमण समुद्रमें उसकी अभ्यन्तर वेदिकासे ३१२५०००– ३०५०००० = ७५००० यो. आगे जाकर पड़ता है। अब उसको भी आधा करनेपर वह $\frac{३१२५०००}{२}$ = १५६२५०० यो. (राजुका तृतीय अर्ध भाग) होता है। सो वह स्वयम्भूरमण द्वीपमें उसकी अभ्यन्तर वेदिकासे आगे १५६२५००–(५०००० + २ लाख + ४ लाख + ८ लाख) = ११२५०० = (७५०००+$\frac{७५०००}{२}$) इतने योजन आगे जाकर पड़ता है। अब इसका भी अर्ध भाग करनेपर वह $\frac{१५६२५००}{२}$ = ७८१२५० यो. (राजुका चतुर्थ अर्ध भाग) होता है। सो वह स्वयम्भूरमण द्वीपके पूर्ववर्ती अहीन्द्रवर समुद्रके भीतर उसकी अभ्यन्तर वेदिकासे आगे ७८१२५० – (५०००० + २ लाख + ४ लाख) = १३१२५० = (७५००० + $\frac{७५०००}{२}$ + $\frac{७५०००}{४}$) इतने योजन जाकर पड़ता है। इसी क्रमसे आगेके क्रमको भी समझ लेना चाहिये। इस क्रमसे अहीन्द्रवर समुद्रके पूर्ववर्ती प्रत्येक द्वीप और समुद्रमें क्रमसे उक्त अर्ध राजुका एक एक अर्धच्छेद पडता हुआ लवण समुद्रमें जाकर दो अर्धच्छेद पड़ते हैं। यहाँ उदाहरणस्वरूप अर्ध राजु और उसके अर्ध अर्ध भागोंकी जो कल्पना की गई है तदनुसार यथार्थको ग्रहण करना चाहिये।

इस प्रथम द्वीप तथा लवणसमुद्रका स्वामी क्रमसे अनादर नामका व्यन्तर देव और सुस्थिर (सुस्थित) देव ये दो व्यन्तर देव हैं। [धातकीखण्ड द्वीपके अधिपति] प्रभास और प्रियदर्शन नामके दो व्यन्तर देव है ॥ २४ ॥ दक्षिण व उत्तर भागमें स्थित काल और महाकाल नामक व्यन्तर देव कालोद समुद्रके तथा पद्म और पुण्डरीक नामक दो देव पुष्कर द्वीपके अधिपति हैं ॥ २५ ॥ चक्षुष्मान् और सुचक्षु नामके दो व्यन्तर देव मानुषोत्तर पर्वतके अधिपति हैं। इस प्रकार दो दो देव आगेके द्वीप और समुद्रमें भी जानना चाहिये। श्रीप्रभ और श्रीधर नामके दो व्यन्तर देव पुष्करवर समुद्रके, वरुण और वरुणप्रभ नामके दो व्यन्तर देव वारुणीवर द्वीपके, तथा मध्य और मध्यम नामके दो देव वारुणीवर समुद्रके अधिपति है ॥ २६–२७ ॥ पाण्डुर

पाण्ड[ण्डु]रः पुष्पदन्तश्च विमलो विमलप्रभः । [1]सुप्रभस्य[श्च] घृताख्यस्य उत्तरश्च महाप्रभः ॥२८
कनकः कनकाभश्च पूर्णः पूर्णप्रभस्तथा । गन्धश्चान्यो[2] महागन्धो नन्दी नन्दिप्रभस्तथा ॥ २९
भद्रश्चैव सुभद्रश्च अरुणश्चारुणप्रभः । सुगन्धः सर्वगन्धश्च अरुणोदे तु सागरे ॥ ३०
एवं द्वीपसमुद्राणां द्वौ द्वावधिपती स्मृतौ । दक्षिणः प्रथमोक्तोऽत्र द्वितीयश्चोत्तरापतिः ॥ ३१
चतुरशीतिश्च लक्षाणि त्रिषष्टिशतकोटयः[3] । [4]नन्दीश्वरवरद्वीपविस्तारस्य प्रमाणकम् ॥ ३२

। १६३८४००००० ।

कोटीनां त्रिशतं सप्तविंशतिं पञ्चषष्टिकम् । लक्षाणां च प्रमामन्तःसूच्यास्तस्य विदुर्बुधाः ॥ ३३
त्रीणि पञ्च च सप्तैव द्वे शून्यं द्वे च रूपकम् । षट् त्रीणि गगनं चैकमन्तःपरिधिरुच्यते ॥ ३४

। १०३६१२०२७५३ ।

कोटीनां षञ्चपञ्चाशच्छतषट्कं[5] त्रिकाधिकम्[6] । त्रिंशल्लक्षाणि तद्द्वीपबाह्यसूचीप्रमा भवेत् ॥

। ६५५३३००००० ।

शून्यं नवैकं चत्वारि पञ्च त्रीणि त्रिकं द्विकम् । सप्त शून्यं द्विकं तस्य परिधिर्बाह्य उच्यते ॥ ३६

। २०७२३३५४१९० ।

और पुष्पदन्त, विमल और विमलप्रभ, घृतद्वीपके दक्षिणमें सुप्रभ और उत्तरमें महाप्रभ, आगे कनक और कनकाभ, पूर्ण और पूर्णप्रभ, गन्ध और महागन्ध, नन्दी और नन्दिप्रभ, भद्र और सुभद्र तथा अरुण और अरुणप्रभ; [ये दो दो देव क्रमसे क्षीरवर द्वीप, क्षीरवर समुद्र, घृतवर द्वीप, घृतवर समुद्र, इक्षुरस (क्षौद्रवर) द्वीप, इक्षुरस (क्षौद्रवर) समुद्र, नन्दीश्वर द्वीप, नन्दीश्वर समुद्र और अरुण द्वीप; इन द्वीप-समुद्रोंके अधिपति हैं।] सुगन्ध और सर्वगन्ध नामके दो व्यन्तर देव अरुणोद समुद्रके अधिपति है ॥ २८–३० ॥ इस प्रकार द्वीप-समुद्रोंके दो दो व्यन्तर देव अधिपति माने गये हैं। इनमे यहाँ प्रथम कहा गया देव दक्षिण दिशाका तथा दूसरा देव उत्तर दिशाका अधिपति है ॥ ३१ ॥

नन्दीश्वर द्वीपके विस्तारका प्रमाण एक सौ तिरेसठ करोड़ चौरासी लाख (१६३८४०००००) योजन है ॥ ३२ ॥ विद्वान् गणधर आदि उसकी अभ्यन्तर सूचीका प्रमाण तीन सौ सत्ताईस करोड़ पैंसठ लाख योजन बतलाते है — १६३८४०००००×२–३००००० = ३२७६५०००००० ॥ ३३ ॥ उसकी अभ्यन्तर परिधि अंकक्रमसे तीन, पांच, सात, दो, शून्य, दो, एक, छह, तीन, शून्य और एक (१०३६१२०२७५३) अर्थात् एक हजार छत्तीस करोड़ बारह लाख दो हजार सात सौ तिरेपन योजन प्रमाण कही गई है ॥ ३४ ॥ उस द्वीपकी बाह्य सूचीका प्रमाण छह सौ पचपन करोड़ तेतीस लाख योजन है – १६३८४००००० × ४ – ३००००० = ६५५३३००००० ॥ ३५ ॥ उसकी बाह्य परिधि अंकक्रमसे शून्य, नौ, एक, चार, पांच, तीन, तीन, दो, सात, शून्य और दो (२०७२३३५४१९०) इतने योजन प्रमाण कही जाती है ॥ ३६ ॥

---

१ आ प 'सुप्रभस्य[श्च]घृता–' इत्याद्युत्तरार्धभागो नास्ति । २ आ प गन्धा° । ३ आ प कोदयः । ४ ब उत्तरार्धभागोऽयं तत्र नास्ति । ५ आ प °शत्शतषटकं । ६ आ प त्रिकादिकम् ।

तस्य मध्येऽञ्जनाः शैलाश्चत्वारो दिक्चतुष्टये । सहस्राणामशीतिश्च चत्वारि च नगोच्छ्रितिः ॥३७
। ८४००० ।
उच्छ्रयेण समो व्यासो मूले मध्ये च मूर्धनि । सहस्रमवगाहश्च वज्रमूला प्रकीर्तिताः ॥ ३८
पूर्वाञ्जनगिरेर्दिक्षु नन्दा नन्दवतीति च । नन्दोत्तरा नन्दिषेणा इति प्राच्यादिवापिकाः ॥ ३९
एकैकनियुतव्यासा मुखमध्यान्तमानतः[1] । नानारत्नजटा वाप्यो वज्रभूमिप्रतिष्ठिताः ॥ ४०
। १००००० ।
अरजा विरजा चान्या अशोका वीतशोकका । दक्षिणस्याञ्जनस्याद्रेः पूर्वाद्याशाचतुष्टये ॥ ४१
विजया वैजयन्ती च जयन्त्यन्यापराजिता । अपरस्याञ्जनस्याद्रेः पूर्वाद्याशाचतुष्टये ॥ ४२
रम्या च रमणीया च सुप्रभा चापरा भवेत् । उत्तरा सर्वतोभद्रा इत्युत्तरगिरिश्रिताः ॥ ४३
कमलकह्लारकुमुदैः सुरभीकृतदिक्तटैः[2] । युक्ताः सर्वाश्च वाप्यस्ता मुक्ता जलचरैः सदा ॥ ४४
अशोकं सप्तपर्णं च चम्पकं चूतमेव च । चतुर्दिशं तु वापीनां प्रतितीरं वनान्यपि ॥ ४५
व्यस्तानि नियुतार्धं च नियुतं चायतानि तु । सर्वाण्येव वनान्याहुर्वेदिकान्तानि सर्वतः ॥ ४६
५०००० । १००००० ।

उस द्वीपके मध्यमें चारों दिशाओंमें चार अंजन पर्वत हैं । इन पर्वतोंकी ऊंचाई चौरासी हजार (८४०००) योजन प्रमाण है ॥ ३७ ॥ इन पर्वतोंका विस्तार मूल, मध्य और शिखरपर भी उंचाईके बराबर (८४०००) तथा अवगाह एक हजार (१०००) योजन मात्र है । इनका मूल भाग वज्रमय कहा गया है ॥ ३८ ॥

पूर्वदिशागत अंजनगिरिकी पूर्वादिक दिशाओंमें क्रमसे नन्दा, नन्दवती, नन्दोत्तरा और नन्दिषेणा (नन्दिघोषा) नामकी चार वापिकायें हैं ॥ ३९ ॥ इन वापियोंका विस्तार मूलमें, मध्यमें और अन्तमें एक लाख (१०००००) योजन प्रमाण है । उक्त वापियाँ अनेक रत्नोंसे खचित और वज्रमय भूमिपर प्रतिष्ठित हैं ॥ ४० ॥ दक्षिण अंजनपर्वतकी पूर्वादि दिशाओंमें अरजा, विरजा, अशोका और वीतशोका नामकी चार वापिकायें स्थित है ॥ ४१ ॥ पश्चिम अंजनपर्वतकी पूर्वादिक दिशाओंमें क्रमसे विजया, वैजयन्ती, जयन्ती और अपराजिता नामकी चार वापिकायें स्थित हैं ॥ ४२ ॥ उत्तर दिशागत अंजनपर्वतके आश्रित पूर्वादि क्रमसे रम्या, रमणीया, सुप्रभा और सर्वतोभद्रा नामकी चार वापिकायें हैं ॥ ४३ ॥ दिङ्मण्डलको सुवासित करनेवाले कमल, कल्हार और कुमुद पुष्पोंसे युक्त वे सब वापिकायें सदा जलचर जीवोंसे रहित हैं ॥ ४४ ॥

वापियोंके प्रत्येक किनारेपर चारों दिशाओंमें अशोक, सप्तपर्ण, चम्पक और आम्र ये चार वन स्थित हैं ॥४५॥ सब ही वन आधा लाख (५००००) योजन विस्तृत, लाख (१०००००) योजन आयत और अन्तमें सब ओर वेदिकासे संयुक्त कहे जाते हैं ॥ ४६ ॥

१ आ प मध्यास्त° । २ ब विकटैः ।

षोडशानां च वापीनां मध्ये दधिमुखाद्रयः । सहस्राणि दशोद्विद्धास्तावत्सर्वत्र विस्तृताः ॥ ४७
। १०००० ।
सहस्रगाढके वज्रमयाः श्वेताश्च वर्तुलाः । तेषामुपरि वेद्यः स्युर्वनानि विविधानि च ॥ ४८
वापीनां बाह्यकोणेषु दृष्टा रतिकराद्रयः । समा दधिमुखैर्हैमाः सर्वे द्वात्रिंशदेव ते ॥ ४९
उक्तं च [ति. प. ५, ६९-७०]—
जोयणसहस्सवासा तेत्तियमेत्तोदया य पत्तेक्कं । अड्ढाइज्जसयाइं अवगाढा रतिकरा गिरिणो ॥
ते चउ-चउकोणेसुं एक्केक्कवहस्स होंति चत्तारि । लोयविणिच्छ[१][य]कत्ता एवं णियमा परुवेंति ॥
द्वीपस्य विदिशास्वन्ये चत्वारोऽञ्जनपर्वताः । समा रतिकरैस्तेऽपि इति सर्वज्ञदर्शनम् ॥ ५०
सर्वेषु तेषु शैलेषु द्विपञ्चशज्जिनालयाः । भद्रसालैः समा मानैस्तान् भक्त्या स्तौमि सर्वदा ॥ ५१
प्रतिवत्सरमाषाढे कार्तिके फाल्गुनेऽपि च । अष्टमीतिथिमारभ्य पूर्णिमान्तं सुरैः सह ॥ ५२
सौधर्मचमरेशानवैरोचनसुरेश्वराः । प्राच्यपाचीप्रतीचीषु उदीच्यां क्रमशो मुदा ॥ ५३
द्वौ द्वौ यामौ जिनेन्द्राणां महाविभवसंयुताः । प्रादक्षिण्येन कुर्वन्ति महाभक्त्या महामहम् ॥ ५४
नन्दीश्वरात्परो द्वीपश्चारुणो नाम कीर्तितः । तस्यारुणवरोऽब्धिश्च विस्तारोऽस्य निशम्यताम् ॥

सोलह वापियोंके मध्यमें दस हजार (१००००) योजन ऊंचे और सब जगह उतने (१००००) ही योजन विस्तृत दधिमुख पर्वत स्थित हैं ॥ ४७ ॥ एक हजार (१०००) योजन अवगाहके भीतर वज्रमय वे पर्वत वर्णसे शुक्ल व गोल आकारसे संयुक्त हैं । उनके ऊपर वेदियां और अनेक प्रकारके वन हैं ॥ ४८ ॥

वापिकाओंके बाह्य कोनोंमें दधिमुख पर्वतोंके समान सुवर्णमय रतिकर पर्वत देखे गये हैं । वे सब पर्वत बत्तीस (३२) ही हैं ॥ ४९ ॥ कहा भी है —

रतिकर पर्वतोंमेंसे प्रत्येक एक हजार (१०००) योजन विस्तृत, उनसे (१००० यो.) मात्र ऊंचे और अढ़ाई सौ (२५०) योजन प्रमाण अवगाहसे संयुक्त हैं ॥ २ ॥ वे रतिकर पर्वत नियमसे प्रत्येक वापीके चार चार कोनोंमें चार हैं, ऐसा लोकविनिश्चय ग्रन्थके कर्ता बतलाते हैं॥३॥

नन्दीश्वर द्वीपकी विदिशाओंमें अन्य चार अंजनपर्वत हैं । वे भी रतिकर पर्वतोंके समान हैं, ऐसा सर्वज्ञका दर्शन है ॥ ५० ॥

उन सब पर्वतोंके ऊपर बावन जिनालय हैं जो प्रमाणमें भद्रसाल वनमें स्थित जिनालयोंके समान हैं । मैं सदा उन जिनालयोंकी भक्तिपूर्वक स्तुति करता हूं ॥ ५१ ॥ प्रतिवर्ष यहां आषाढ, कार्तिक और फाल्गुन मासमें [शुक्ल पक्षमें] अष्टमीसे लेकर पूर्णिमा तक अर्थात् अष्टाह्निक पर्वमें अन्य देवोंके साथ सौधर्म, चमर, ईशान और वैरोचन ये चार इन्द्र हर्षित होकर क्रमसे पूर्व, दक्षिण, पश्चिम और उत्तर दिशामें महाविभूतिके साथ भक्तिपूर्वक प्रदक्षिणक्रमसे दो दो पहर तक जिनेन्द्रोंकी महामह पूजाको करते हैं ॥ ५२–५४॥

नन्दीश्वर द्वीपके आगे अरुण नामका द्वीप कहा गया है, उसको वेष्टित करके अरुणवर

१ आ प विणिच्छे ।

पञ्चभ्यः खलु शून्येभ्यः परं द्वे सप्त चाम्बरम् । एकं त्रीणि च रूपं च चक्रवालस्य पार्थवम् ॥ ५६
। १३१०७२०००००।

अरिष्टाख्योऽन्धकारोऽस्माद् दूरमुद्गत्य सागरात् । आच्छाद्य चतुरः कल्पान् ब्रह्मलोकं समाश्रितः॥
मृदङ्गसदृशाकाराः कृष्णराज्यश्च सर्वतः । यमकावेदिकातुल्या अष्टौ तस्य बहिःस्थिताः ॥ ५८
देवा अल्पर्द्धयस्तस्मिन् दिग्मूढाश्चिरमासते । महर्द्धिकप्रभावेन सह यान्ति न चान्यथा ॥ ५९
द्वीपस्य कुण्डलाख्यस्य कुण्डलाद्रिस्तु मध्यमः । पञ्चसप्ततिमुद्विद्धः सहस्राणां महागिरिः ॥ ६०
मानुषोत्तरविष्कम्भाद् व्यासो दशगुणस्य च । तस्य षोडशकूटानि चत्वारि प्रतिदिशं क्रमात् ॥६१
१०२२० । ७२३० । ४२४० ।

वज्रं वज्रप्रभं चैव कनकं कनकप्रभम् । रजतं रजताभं च सुप्रभं च महाप्रभम् ॥ ६२
अङ्कमङ्कप्रभं चेति मणिकूटं मणिप्रभं । रुचकं रुचकाभं च[1] हिमवन्मन्दराख्यकम् ॥ ६३
नान्दनैः सममानेषु वेश्मान्यपि समानि तैः । जम्बूनाम्नि च तेऽन्यस्मिन् विजयस्येव वर्णना ॥ ६४
चैत्यान्यनादिसिद्धानि मध्ये तुल्यानि नैषधे. । विक्षु चत्वार्यनादित्वं यथा संसारमोक्षयोः ॥ ६५

समुद्र स्थित है । इस समुद्रका विस्तार कहा जाता है, उसे सुनिये ॥ ५५ ॥ पांच शून्योंके आगे दो, सात, शून्य, एक, तीन और एक (१३१०७२०००००) इन अंकोंके क्रमसे जो संख्या प्राप्त हो उतने योजन मात्र मण्डलाकारसे स्थित उक्त समुद्रका विस्तार जानना चाहिये ॥ ५६ ॥ इस समुद्रसे दूर ऊपर उठा हुआ अरिष्ट नामका अन्धकार प्रथम चार कल्पोंको आच्छादित करके ब्रह्मलोक (पांचवा कल्प) को प्राप्त हुआ है ॥ ५७ ॥ मृदंगके समान आकारवाली आठ कृष्ण-राजियां उसके बाह्य भागमें सब ओर यमका वेदिकाके समान स्थित हैं ॥ ५८ ॥ उस सघन अन्धकारमें अल्पर्द्धिक देव दिशाभेदको भूलकर चिर काल तक स्थित रहते हैं । वे यहांसे दूसरे महर्द्धिक देवोंके प्रभावसे उनके साथ निकल पाते हैं, अन्य प्रकारसे नहीं निकल सकते हैं ॥५९॥

आगे कुण्डल नामक ग्यारहवें द्वीपके मध्यमें कुण्डल पर्वत स्थित है । वह महापर्वत पचत्तर हजार (७५०००) योजन ऊंचा है। विस्तार उसका मानुषोत्तर पर्वतसे दसगुणा है (मूल विस्तार १०२२×१०=१०२२०, मध्य विस्तार ७२३×१०=७२३०, शिखर विस्तार (४२४ ×१०=४२४० यो.) । उसके ऊपर सोलह कूट हैं जो निम्न क्रमसे प्रतिदिशामें चार चार हैं– वज्र, वज्रप्रभ, कनक, कनकप्रभ; रजत, रजताभ, सुप्रभ, महाप्रभ; अंक, अंकप्रभ, मणिकूट, मणिप्रभ; तथा रुचक, रुचकाभ, हिमवान् और मन्दर ॥ ६०–६३ ॥ ये कूट विस्तारादिके प्रमाणमें नन्दन वनमें स्थित कूटोंके समान हैं । यहाँ जो भवन हैं वे भी नन्दनवनके भवनोंके समान हैं । उनका वर्णन दूसरे जंबूद्वीपमें स्थित विजय देवके नगरोंके समान है ॥ ६४ ॥

उक्त कूटोंके मध्यमें दिशाओंमें अनादिसिद्ध चार जिनभवन हैं जो निषध पर्वतस्थ जिनभवनोंके समान हैं । इनकी अनादिता ऐसी है जैसी कि संसार और मोक्षकी ॥ ६५ ॥

---

१ ब 'च' नास्ति

तदन्तः सिद्धकूटानि दिक्षु चत्वारि मानतः । समानि नैषधैस्तत्र चत्वारश्च जिनालयाः ॥ ६६
पाठान्तरम् ।
तस्य दिक्षु च चत्वारि विदिक्षु च महागिरेः । अष्टावायतनान्याहुः समभानानि नैषधैः ॥ ६७
उक्तं च [ति. प. ५,१२८] –
तग्गिरिवरस्स होंति उ[1] दिसिविदिसासुं जिणिंदकूडाणि । पत्तेक्कं एक्केक्कं केई एवं परूवेंति ॥
द्वीपस्त्रयोदशो नाम्ना रुचकस्तस्य मध्यमः । अद्रिश्च वलयाकारो रुचकस्तापनीयकः ॥ ६८
महाञ्जनगिरेस्तुल्यो विष्कम्भेणोच्छ्रयेण च । तस्य मूर्धनि पूर्वस्यां कूटाश्चाष्टाविति स्मृताः ॥६९
कनकं काञ्चनं कूटं तपनं स्वस्तिकं दिशः । सुभद्रमञ्जनं मूलं चाञ्जनाद्यं च वज्रकम् ॥ ७०
उच्छ्रितानि सहस्रार्धं मूले तावत्प्रथूनि च । तदर्धमग्रे रुन्द्राणि गौतमस्येव चालयाः ॥ ७१
विजयाद्याश्चतस्रश्च नन्दा नन्दवतीति च । नन्दोत्तरा नन्दिषेणा तेष्वष्टौ दिक्सुरस्त्रियः ॥ ७२
स्फटिकं रजतं चैव कुमुदं नलिनं पुनः । पद्मं च शशिसंज्ञं च ततो वैश्रवणाख्यकम् ॥ ७३
वैडूर्यमष्टकं कूटं पूर्वकूटसमानि च । दक्षिणस्यामथैतानि दिक्कुमार्योऽत्र च स्थिताः ॥ ७४
इच्छा नाम्ना समाहारा सुप्रतिज्ञा यशोधरा । लक्ष्मी शेषवती चान्या चित्रगुप्ता वसुंधरा ॥ ७५

उनके मध्यमें दिशाओंमें चार सिद्धकूट हैं जो प्रमाणमें निषध पर्वतके ऊपर स्थित सिद्धकूटके समान हैं। उनके ऊपर चार जिनालय हैं ॥ ६६ ॥ पाठान्तर।

उस महापर्वतकी दिशाओंमें चार और विदिशाओंमें चार, इस प्रकार आठ जिनायतन हैं जो प्रमाणमें निषधपर्वतस्थ जिनभवनके समान हैं ॥ ६७ ॥ कहा भी है –

उस गिरीन्द्रकी दिशाओं और विदिशाओंमें प्रत्येकमें एक एक जिनेन्द्रकूट है, ऐसा कितने ही आचार्य निरूपण करते हैं ॥ ४ ॥

तेरहवां द्वीप रुचक नामका है। उसके मध्यमें तपाये हुये सुवर्णके समान कान्तिवाला वलयाकार रुचक नामका पर्वत स्थित है ॥ ६८ ॥ वह विस्तार और ऊंचाईमें महान् अंजनगिरिके समान (८४००० यो.) है। उसकी शिखरके ऊपर पूर्व दिशामें ये आठ कूट माने गये हैं– कनक, कांचन, तपन, स्वस्तिक, सुभद्र, अंजन, अंजनमूल और वज्र ॥६९–७०॥ ये कूट सहस्रके आधे अर्थात् पांच सौ (५००) योजन ऊंचे और मूलमें उतने (५०० यो.) ही विस्तृत हैं। शिखरपर उनका विस्तार उससे आधा (२५०) है। इनके ऊपर जो प्रासाद स्थित हैं वे गौतम देवके प्रासादोंके समान हैं ॥ ७१ ॥ इन कूटोंके ऊपर उक्त प्रासादोंमें विजया आदि (वैजयन्ती, जयन्ती और अपराजिता) चार तथा नन्दा, नन्दवती, नन्दोत्तरा और नन्दिषेणा ये आठ दिक्कुमारी देवियां रहती हैं ॥ ७२ ॥

स्फटिक, रजत, कुमुद, नलिन, पद्म, शशी नामक (चन्द्र), वैश्रवण और वैडूर्य ये आठ कूट पूर्वदिशागत कूटोंके ही समान होकर दक्षिण दिशामें स्थित हैं। इन कूटोंके ऊपर निम्न दिक्कुमारी देवियां स्थित हैं– इच्छा, समाहार, सुप्रतिज्ञा, यशोधरा, लक्ष्मी, शेषवती, चित्रगुप्ता और वसुंधरा ॥ ७३–७५ ॥

---

१ ति. प. 'उ' नास्ति

अमोघं स्वस्तिकं कूटं मन्दरं च तृतीयकम् । ततो हैमवतं कूटं राज्यं राज्योत्तमं ततः ॥ ७६
चन्द्रं सुदर्शनं चेति अपरस्यां तु लक्षयेत् । रुचकस्य गिरीन्द्रस्य मध्ये कूटानि तेष्विमाः ॥ ७७
इलादेवी सुरादेवी पृथिवी पद्मवत्यपि । एकनासा नवमिका सीता भद्रेति चाष्टमी ॥ ७८
विजयं वैजयन्तं च जयन्तमपराजितम् । कुण्डलं रुचकं चैव रत्नवत्सर्वरत्नकम् ॥ ७९
अलंबूषा मिश्रकेशी तृतीया पुण्डरीकिणी । वारुण्याशा च सत्या च ह्रीः श्रीश्चैतेषु देवताः ॥ ८०
पूर्वा गृहीत्वा भृङ्गारान् दक्षिणा दर्पणान् परान् । अपरा[1] आतपत्राणि चामराण्युत्तमाङ्गना[2]ः ॥
दिशाकुमार्यो द्वात्रिंशत्सादराः कृतमण्डनाः । जिनानां जन्मकालेषु सेवार्थमुपयान्ति ताः ॥ ८२
पूर्वे तु विमलं कूटं नित्यालोकं स्वयंप्रभम् । नित्योद्द्योतं तदन्तः स्युस्तुल्यानि गृहमानकैः ॥ ८३
कनका विमले कूटे दक्षिणे च शतह्रदा । ततः कनकचित्रा च सौदामिन्युत्तरे स्थिताः ॥ ८४
अर्हतां जन्मकालेषु दिशा उद्द्योतयन्ति ताः । श्रीवत्सवपरिवाराद्यैः सर्वा एता इति स्मृताः ॥८५
वैडूर्यं रुचकं कूटं मणिकूटं च पश्चिमम् । राज्योत्तमं तदन्तः स्युः पूर्वमानसमानि च ॥ ८६ ॥

अमोघ, स्वस्तिक, तीसरा मन्दर, हैमवत, राज्य, राज्योत्तम, चन्द्र और सुदर्शन; ये आठ कूट रुचक पर्वतके मध्यमें पश्चिम दिशामें स्थित जानना चाहिये । उनके ऊपर ये दिक्कुमारिकायें निवास करती हैं– इलादेवी, सुरादेवी, पृथिवी, पद्मवती, एकनासा, नवमिका, सीता और आठवीं भद्रा ॥ ७६–७८ ॥

विजय, वैजयन्त, जयन्त, अपराजित, कुण्डल, रूचक, रत्नवान् और सर्वरत्न; ये आठ कूट उसके ऊपर उत्तर दिशामें स्थित हैं ॥ ७९ ॥ इनके ऊपर ये आठ दिक्कुमारी देवियां रहती हैं– अलंबूसा, मिश्रकेशी, तृतीय पुण्डरीकिणी, वारुणी, आशा, सत्या, ह्री और श्री ॥ ८० ॥

इनमेंसे पूर्वदिशामें स्थित उक्त आठ दिक्कुमारिकायें झारियोंको, दक्षिणदिशागत आठ देवियां उत्तम दर्पणोंको, पश्चिमदिशावासिनी छत्रोंको, तथा उत्तरदिशाकी आठ दिक्कन्यायें चामरोंको ग्रहण कर; इस प्रकार वे सुसज्जित बत्तीस (३२) दिक्कुमारिकायें तीर्थंकरोंके जन्म कल्याणकोंमें सविनय सेवा करनेके लिये उपस्थित होती हैं ॥ ८१–८२ ॥

उक्त कूटोंके अभ्यन्तर भागमें पूर्व [आदि दिशाओंमें क्रमसे] विमल कूट, नित्यालोक, स्वयंप्रभ और नित्योद्योत ये चार कूट स्थित हैं । वे सब गृहमानोंसे समान हैं ॥ ८३ ॥ इनमेंसे विमल कूटके ऊपर कनका, दक्षिण कूटके ऊपर शतह्रदा, पश्चिम कूटके ऊपर कनकचित्रा और उत्तर कूटके ऊपर सौदामिनी देवियां स्थित हैं ॥ ८४ ॥ वे देवियां तीर्थंकरोंके जन्मकालोंमें दिशाओंको उद्योतित करती हैं । ये सब देवियां परिवार आदिमें श्रीदेवीके समान मानी गई हैं ॥ ८५ ॥

उनके भी अभ्यन्तर भागमें वैडूर्य, रुचककूट, मणिकूट और अन्तिम राज्योत्तम ये चार

१ ब आपरा । २ [°तराङ्गना]

रुचका रुचककीर्तिश्च कान्ता रुचकादिका । रुचकैव प्रभान्त्याख्या[1] जातिकर्मसमापिकाः ॥ ८७
तत्कूटाभ्यन्तरे दिक्षु चत्वारः सिद्धकूटकाः । पूर्वमानसमा मानैश्चत्वारोऽत्र जिनालयाः ॥ ८८
विदिक्षु दिक्षु चाप्यस्य अष्टास्वन्तरदिक्षु च । चैत्यानि षोडशेऽष्टानि समान्यपि च नैषधैः ॥ ८९

उक्तं च [ति. प. ५,१६६]

दिसिविदिसंतरभागे चउ चउ अट्ठाणि सिद्धकूडाणि । उच्छेहप्पहुदीए णिसहसमा केइ इच्छन्ति ॥५
स्वयंभूरमणो द्वीपश्चरमस्तस्य मध्यगः । सहस्रमवगाढश्च गिरिरस्ति स्वयंप्रभः ॥ ९०
रत्नांशुद्योतिताशस्य तस्य वेदीयुतस्य च । विष्कम्भोत्सेधकूटानां मानं दृष्टं जिनेश्वरैः ॥ ९१
मानुषोत्तरशैलश्च कुण्डलो रुचकाचलः । स्वयंप्रभाचलश्चैते वलयाकृतयो मताः ॥ ९२

इति लोकविभागे समुद्रविभागो नाम चतुर्थप्रकरणं समाप्तम् ॥ ४ ॥

कूट स्थित है । इनका प्रमाण पूर्व कूटोंके समान है ॥ ८६ ॥ उनके ऊपर रुचका, रुचककीर्ति, रुचककान्ता और रुचकप्रभा ये चार दिक्कुमारिकायें रहती है जो तीर्थंकरोंके जातकर्मको समाप्त किया करती हैं ॥ ८७ ॥

उन कूटोंके अभ्यन्तर भागमें पूर्वादिक दिशाओंमें चार सिद्धकूट स्थित हैं । इनके ऊपर पूर्वोक्त जिनभवनोंके समान प्रमाणवाले चार जिनभवन हैं ॥८८॥ इसकी दिशाओंमें, विदिशाओंमें और आठ अन्तर्दिशाओंमें भी सोलह चैत्यालय स्वीकार किये गये है जो प्रमाणमें निषध-पर्वतस्थ जिनभवनोंके समान हैं ॥ ८९ ॥ कहा भी है —

रुचक पर्वतके ऊपर दिशाओंमें चार, विदिशाओंमें चार और अन्तर्दिशाओंमें आठ इस प्रकार सोलह सिद्धकूट स्थित हैं जो ऊंचाई आदिमें निषध पर्वतके सिद्धकूटके समान हैं; ऐसा कुछ आचार्य स्वीकार करते है ॥ ५ ॥

अन्तिम द्वीप स्वयम्भूरमण है । उसके मध्यमें एक हजार योजन अवगाहवाला स्वयंप्रभ पर्वत स्थित है ॥ ९० ॥ रत्नकिरणोंसे दिशाओंको प्रकाशित करनेवाले एवं वेदीसे संयुक्त उस पर्वतके विस्तार, ऊंचाई और कूटोंका प्रमाण जितना जिनेन्द्रोंके द्वारा देखा गया है उतना जानना चाहिये । अभिप्राय यह है कि उसका उपदेश नष्ट हो चुका है ॥९१ ॥ मानुषोत्तर शैल, कुण्डलगिरि, रुचक पर्वत और स्वयंप्रभाचल ये चार पर्वत वर्तुलाकार माने गये हैं ॥ ९२ ॥

इस प्रकार लोकविभागमें समुद्रविभाग नामका चौथा प्रकरण समाप्त हुआ ॥ ४ ॥

१ ब प्रभान्त्यन्या ।

[पञ्चमो विभागः]

अनाद्यनिधनं कालं संवृत्तं सर्वपर्ययैः । पश्यतः प्रणिपत्येशान् वक्ष्ये कालगतिक्रमम् ॥ १
कालोऽवसर्पिणीत्येक उत्सर्पिण्यपरोऽपि च । एते समाहृते कल्पो विभागा द्वादशानयोः ॥ २
सुषमा सुषमान्ता च द्वितीया सुषमेति च । सुषमा दुःषमान्तान्या सुषमान्ता च दुःषमा ॥ ३
पञ्चमो दुःषमेत्येव समा षष्ठ्यतिदुःषमा । विभागा अवसर्पिण्यामितरस्यां विपर्ययः ॥ ४
चतस्रश्च ततस्तिस्रो द्वे च तासां क्रमात् स्मृताः । सागरोपमकोटीनां कोट्यो वै तिसृणामपि ॥ ५
सा ४०००००००००००००० । सा ३०००००००००००००० । सा २००००००००००००००० ।
द्विचत्वारिंशता न्यूना सहस्रैरब्दसंख्यया । कोटीकोटी भवेदेका चतुर्थ्यां तु प्रमाणतः ॥ ६
सा १००००००००००००० । ४२००० ।
पञ्चम्यब्दसहस्राणामेकविंशतिरेव सा । तावत्येव समा षष्ठी कोटीकोट्यो दशैव ताः ॥ ७
२१००० । २१००० । सा १० को २ ।
आदावाद्यसमायाश्च नरा उद्यद्रविप्रभाः । आहरन्त्यष्टमे भक्तं त्रिगव्यूतिसमुच्छ्रिताः ॥ ८
प्रारम्भे च द्वितीयाया नराः पूर्णशशिप्रभाः । आहरन्ति च षष्ठेऽन्नं द्विगव्यूतिसमुच्छ्रयाः ॥ ९

समस्त पर्यायोंसे उपलक्षित अनादि-निधन कालको देखनेवाले जिनेन्द्रोंको नमस्कार करके कालकी गतिके क्रमका वर्णन करता हूं ॥ १ ॥ एक अवसर्पिणी और दूसरा उत्सर्पिणी इस प्रकारसे सामान्यरूपसे कालके दो भेद हैं। इन दोनोंको सम्मिलितरूपमें कल्प काल कहा जाता है। इन दोनोंके बारह (६+६) विभाग हैं ॥ २ ॥ सुषमासुषमा, दूसरा सुषमा, सुषमादुःषमा, दुःषमासुषमा, पांचवां दुःषमा और छठा अतिदुःषमा; इस प्रकार ये छह अवसर्पिणी कालके विभाग हैं। उत्सर्पिणी कालके विभाग इनसे विपरीत (अतिदुःषमा, दुःषमा, दुःषमासुषमा, सुषमादुःषमा, सुषमा और सुषमासुषमा) हैं ॥ ३–४ ॥ इनमें प्रथम तीन कालोंका प्रमाण यथाक्रमसे चार, तीन और दो कोड़ाकोड़ि सागरोपम माना गया है– सुषमासुषमा ४०००००००००००००० सागरोपम, सुषमा ३०००००००००००००० सा., सुषमदुःषमा २०००००००००००००० सा. ॥ ५ ॥ चतुर्थ (दुःषमसुषमा) कालका प्रमाण ब्यालीस हजार वर्ष कम एक कोड़ाकोड़ि सागरोपम है १००००००००००००० सा. – ४२००० वर्ष ॥ ६ ॥ पांचवें (दुःषमा) कालका प्रमाण इक्कीस हजार (२१०००) वर्ष मात्र ही है। इतने ही (२१०००) वर्ष प्रमाण छठा काल भी है। इस प्रकारसे उत्सर्पिणी और अवसर्पिणीके उक्त छहों कालोंका प्रमाण सम्मिलितरूपसे दस (१०) कोड़ाकोड़ि सागरोपम मात्र होता है ॥ ७ ॥

प्रथम कालके प्रारम्भमें उदित होते हुए सूर्यके समान प्रभावाले मनुष्य तीन कोस शरीरकी ऊंचाईसे सहित होते हुए अष्टम भक्तमें अर्थात् चौथे दिन आहार ग्रहण करते हैं ॥ ८ ॥ द्वितीय कालके प्रारम्भमें मनुष्योंकी प्रभा पूर्ण चन्द्रके समान और शरीरकी ऊंचाई दो कोस प्रमाण

आदावपि तृतीयायाः प्रियङ्गुश्यामवर्णकाः । चतुर्थभक्तेनाहारमेकां गव्यूतिमुच्छ्रिताः ॥ १०
षट्पञ्चाशच्छते द्वे च तथाष्टाविंशतिः शतम् । चतुःषष्टिः क्रमात्तासु नराणां ष [पृ] ष्ठकण्डकाः ११
२५६ । १२८ । ६४ ।
जीवितं त्रीणि पल्यानि द्वे चैकं च क्रमागतम् । मानुषा मिथुनान्येव कल्पवृक्षोपजीविनः ॥ १२
मृदङ्गभृङ्गरत्नाङ्गाः पानभोजनपुष्पदाः । ज्योतिरालयवस्त्राङ्गाः कल्पागैर्दशधा[1] द्रुमाः ॥ १३
उक्तं च [ति. प. ४-३४२, ८२९]--
पाणंगतूरिअंगा भूसणवत्थंग भोयणंगा य । आलयदीवियभायणमालातेअंगआदि[2] कप्पतरू ॥१
पुष्करं पटहं भेरीं दुन्दुभिं पणवादि च । वीणावंशमृदङ्गांश्च दध[द]ते तूर्यपादपाः ॥ १४
भृङ्गारकलशस्थालीस्थालवृत्तकशुक्तिकाः[3] । कुचाकरकपात्राणि[4] ददते[5] भृङ्गसंज्ञकाः ॥ १५
नराणां षोडशविधं स्त्रीणामपि चतुर्दश । विविधमाभरणं नित्यं रत्नाङ्गा ददते[6] शुभम् ॥ १६
वीर्यसाररसोपेतं सुगन्धिप्रीतिपूरकम् । द्वात्रिंशद्भेदकं पानं सूयन्ते पानपादपाः ॥ १७
षोडशान्नविधीन् मृष्टानु[नो]दनस्य च षोडश । चतुर्दशविधान् सूपान् स्वाद्यं त्वष्टोत्तरं शतम् ॥

होती है । वे षष्ठ भक्तमें अर्थात् दो दिनके अन्तरसे आहार ग्रहण करते हैं ॥९॥ तीसरे कालके प्रारम्भमें प्रियंगु पुष्पके समान प्रभावाले मनुष्य एक कोस प्रमाण शरीरकी ऊंचाईसे सहित होते हुए चतुर्थ भक्तसे अर्थात् एक दिनके अन्तरसे आहार करते हैं ॥ १० ॥

उन तीन कालोंमें मनुष्योंकी पृष्ठास्थियां क्रमसे दो सौ छप्पन (२५६), एक सौ अट्ठाईस (१२८) और चौंसठ (६४) होती हैं ॥ ११ ॥ इन कालोंमें मनुष्योंकी आयुका प्रमाण यथाक्रमसे तीन पल्य, दो पल्य और एक पल्य होता है । उक्त कालोंमें मनुष्य युगलरूपसे ही उत्पन्न होकर कल्पवृक्षोंसे आजीविका करते हैं अर्थात् उन्हें समस्त भोगोपभोगकी सामग्री कल्पवृक्षोंसे ही प्राप्त होती है ॥ १२ ॥ इन तीन कालोंमें कल्पवृक्षोंके मृदंगांग (तूर्यांग), भृंगांग (भाजनांग), रत्नांग (भूषणांग), पानांग (मद्यांग), भोजनांग, पुष्पांग (मालांग), ज्योतिरंग, आलयांग और वस्त्रांग ये दस प्रकारके वृक्ष होते हैं ॥ १३ ॥ कहा भी है --

पानांग, तूर्यांग, भूषणांग, वस्त्रांग, भोजनांग, आलयांग, दीपांग, भाजनांग, मालांग और ज्योतिरंग; इस तरह वे कल्पवृक्ष दस प्रकारके हैं ॥ १ ॥

तूर्यांग कल्पवृक्ष पुष्कर, पटह, भेरी, दुंदुभि, पणव (ढोल) आदि, वीणा, बांसुरी और मृदंग वाद्योंको देते हैं ॥१४॥ भृंग नामक कल्पवृक्ष भृंगार, कलश, थाली, थाल, वृत्तक, शुक्तिक, कुच और करक (जलपात्र); इन पात्रोंको देते हैं ॥ १५ ॥ रत्नांग कल्पवृक्ष पुरुषोंके सोलह प्रकारके और स्त्रियोंके चौदह प्रकारके उत्तम विविध आभरणोंको नित्य ही देते हैं ॥ १६ ॥ पानांग कल्पवृक्ष वीर्यवर्धक श्रेष्ठ रससे संयुक्त, सुगन्धित और प्रीतिको पूर्ण करनेवाले बत्तीस प्रकारके पानको उत्पन्न करते हैं ॥ १७ ॥ भोजनांग कल्पवृक्ष सोलह प्रकारके स्वादिष्ट अन्न

---

१ प कल्पांगै । २ आ प अंगमादि । ३ आ प ब शुकिकाः । ४ प पत्राणि । ५ ब दधते ।

त्रिषष्टि त्रिशतं भेदान् शाकानां रसनप्रियान् । चक्रवर्त्यन्नतो मृष्टान् ददते भोजनद्रुमाः ॥ १९
वल्लीगुल्मद्रुमोद्भूतं सहस्राहतषोडश । विधं वर्णद्वयं पुष्पं मालाङ्गागाः फलन्ति च ॥ २०
चन्द्रसूर्यप्रभावन्तो द्योतयन्तो दिशो दश । कुर्वाणाः संततालोकं ज्योतिरङ्गा[1] वसन्ति च ॥ २१
नन्द्यावर्तादिकद्वयष्टभेदान् प्रासादकान् शुभान् । रत्नहेममयान् नित्यं ददते[2] चालयाङ्गकाः ॥२२
क्षौमकौशेयकार्पासपट्टचीनादिभिः समम् । वस्त्रं चित्रं मृदुश्लक्ष्णं वस्त्राङ्गा ददते[2] द्रुमाः ॥ २३
मूलपुष्पफलैरिष्टैर्वल्लीगुल्मक्षुपद्रुमाः । कल्पागाः परितः सन्ति रम्यच्छाया मनोरमाः ॥ २४
दिवसैरेकविंशत्या पूर्यन्ते यौवनेन च । प्रमाणयुक्तसर्वाङ्गा द्वात्रिंशल्लक्षणाङ्किताः ॥ २५
मार्दवार्जवसंपन्नाः सत्यमृष्टसुभाषिताः । मृदङ्गमेघनिःस्वाना नवसहस्रेभविक्रमाः ॥ २६
प्रकृत्या धीरगम्भीरा निपुणाः स्थिरसौहृदाः । अदृष्टललिताचाराः प्रसन्नाः प्रीतिबुद्धयः ॥ २७
क्रोधलोभभयद्वेषमानमत्सरवर्जिताः । ईर्ष्यासूयापवादानां न विदन्ति सदा रसम् ॥ २८
सेवादुःखं परैर्निन्दा ईप्सितस्यानवापनम् । प्रियेभ्यो विप्रयोगश्च तिसृष्वपि समासु[3] न ॥ २९

भेदोंको, सोलह प्रकारके ओदन (भात) को, चौदह प्रकारकी दालोंको, एक सौ आठ प्रकारके स्वाद्य भोजनको तथा रसना इन्द्रियको प्रिय ऐसे तीन सौ तिरेसठ (३६३) शाकके भेदोंको; इस प्रकार चक्रवर्तीके अन्नसे स्वादिष्ट भोजनोंको देते हैं ॥१८-१९॥ मालांग वृक्ष वेलों, झाड़ियों एवं वृक्षोंसे उत्पन्न सोलह हजार (१६०००) प्रकारके पुष्पोंको उत्पन्न करते हैं॥२०॥ चन्द्र एवं सूर्य जैसी प्रभासे संयुक्त होकर दस दिशाओंको प्रकाशित करनेवाले ज्योतिरंग वृक्ष निरन्तर प्रकाश करते हुए स्थित रहते हैं ॥२१॥ आलयांग जातिके कल्पवृक्ष नंद्यावर्त आदि सोलह प्रकारके रत्नमय एवं सुवर्णमय उत्तम भवनोंको नित्य ही प्रदान करते हैं ॥ २२ ॥ वस्त्रांग वृक्ष क्षौम (सनका वस्त्र), कौशेय (रेशमी), कार्पास (कपाससे निर्मित) वस्त्र तथा चीनदेशीय आदि वस्त्रोंके साथ कोमल एवं चिक्कण विचित्र वस्त्रोंको देते हैं ॥ २३ ॥ वल्ली, गुल्म (झाड़ी), क्षुप (छोटी शाखाओं एवं मूलोंवाला) और द्रुम (वृक्ष) रूप रमणीय छायावाले मनोहर कल्पवृक्ष वहां अभीष्ट मूलों, पुष्पोंऔर फलोंके साथ सब ओर होते हैं ॥ २४ ॥

इन तीन कालोंमें प्रमाणयुक्त सब अवयवोंसे संयुक्त तथा बत्तीस लक्षणोंसे चिह्नित नर-नारी इक्कीस (२१) दिनोंमें यौवनसे परिपूर्ण हो जाते हैं। ये नर-नारी मार्दव एवं आर्जवसे सहित, सत्य व मधुर भाषण करनेवाले, मृदंग अथवा मेघके समान ध्वनिसे संयुक्त, नौ हजार (९०००) हाथियोंके बराबर पराक्रमसे सहित, स्वभावतः धीर और गम्भीर, निपुण, स्थिर सौहार्दसे सम्पन्न, अदृष्ट ललित आचारवाले, प्रसन्न, प्रीतिबुद्धि तथा क्रोध, लोभ, भय, द्वेष, मान एवं मत्सरतासे रहित होते हैं। वे ईर्ष्या, असूया और परनिन्दाके आनन्दको कभी नहीं जानते हैं ॥ २५-२८ ॥

तीनों ही कालोंमें उन नर-नारियोंके सेवाका दुख, परनिन्दा, अभीष्टकी अप्राप्ति तथा

---

१ प रिंगा । २ ब दधते । ३ प तिसृष्वपि सभासु ।

न राजानो न पाषण्डा[1] न चोरा नापि शत्रवः[2]। न कर्माणि न शिल्पानि न दारिद्र्यं न चामयाः॥
सूरूपाः सुभगा नार्यो गीतवाद्यित्रपण्डिताः[3]। एकभर्तृसुखा नित्यं निःप्रयोजनसौहृदाः ॥ ३१
रत्नैराभरणैर्दीप्ता गन्धमाल्यविभूषिताः। दिव्यवस्त्रसमाच्छन्ना रतिरागपरायणाः ॥ ३२
अन्योऽन्यवी[क्ष]णासक्ता अन्योऽन्यस्यानुवर्तिनः। अन्योऽन्यहितमिच्छन्तोऽन्योन्यं[4] न त्यजन्ति ते॥३३
क्षुतकासितमात्रेण त्यक्त्वान्ते जीवितं स्वकम्। सौधर्मव्यन्तरादेषु जायन्तेऽल्पकषायिणः ॥३४

उक्तं च त्रिलोकसारे [७८६,७८९–९१] –

वदरक्खामलयप्पमकप्पद्दुमदिण्णदिव्वआहारा[5]। वरपहुदितिभोगभुमा मंदकसाया विणीहारा ॥
जादजुगलेसु दिवसा सग सग अंगुट्ठलेहरंगिदये[6]। अथिरथिरगदिकलागुणजोव्वणदंसणगहे जंति ॥
तद्दंपदीणमादिमसंहदिसंठाणमज्जणामजुदा। सुलहेसु वि णो तित्ती तेसिं पच्चक्खविसएसु ॥४
चरमे खुदजंभवसा णरणारि विलीय सरदमेहं वा। भवणतिगामी मिच्छा सोहम्मदुजाइणो सम्मा ॥

प्रिय पदार्थोंका वियोग नहीं होता ॥ २९ ॥ इन कालोंमें न राजा होते हैं, न पाखण्डी होते हैं, न चोर होते हैं, न शत्रु होते हैं, न कर्म (कृषि आदि) होते हैं, न शिल्पकार्य होते हैं, न दरिद्रता होती है, और न रोग भी होते हैं ॥ ३० ॥

इन कालोंमें स्त्रियाँ सुन्दर रूपसे सहित, सुभग, गीत व वादित्रमें निपुण सदा एक ही पतिके सुखका अनुभव करनेवाली, निःस्वार्थ सौहार्दसे सम्पन्न, रत्नों व आभरणोंसे देदीप्यमान, सुगन्धित मालाओंसे विभूषित, दिव्य वस्त्रोंसे अलंकृत और रतिरागमें परायण होती हैं ॥३१–३२॥ परस्परके दर्शनमें आसक्त, परस्परकी इच्छानुसार प्रवृत्ति करनेवाले और परस्परके हितके इच्छुक वे युगल एक दूसरेको नहीं छोड़ते हैं ॥३३॥ अन्तमें वे (नर-नारी) क्रमशः छींक और जृंभा मात्रसे अपने जीवितको छोड़कर अल्प कषायसे संयुक्त होनेके कारण सौधर्मादिक विमानवासी देवोंमें अथवा व्यन्तरादिकोंमें उत्पन्न होते हैं ॥ ३४ ॥ त्रिलोकसारमें कहा भी है–

उत्तम आदि तीन भोगभूमियोंमें उत्पन्न हुए नर-नारी क्रमसे बेर, बहेड़ा और आंवले-के प्रमाण कल्पवृक्षोंसे दिये गये दिव्य आहारके करनेवाले; मन्दकषायी और मल-मूत्रसे रहित होते हैं ॥ २ ॥ इन उत्पन्न हुए युगुलोंमें अंगूठेके चूसने, उठकर खड़े होने, अस्थिर गमन, स्थिर गमन, कला-गुणग्रहण, यौवनग्रहण और सम्यग्दर्शनग्रहणमें सात सात दिन व्यतीत होते हैं। अर्थात् वे उनंचास (४९) दिनमें यौवनको प्राप्त होकर सम्यग्दर्शनग्रहणके योग्य हो जाते हैं ॥ ३ ॥ उन दम्पतियोंके प्रथम (वज्रर्षभवज्रनाराच) संहनन और प्रथम (समचतुरस्र) संस्थान होता है। आर्य इस नामसे संयुक्त उन दम्पतियोंको पंचेन्द्रियजनित विषयोंके सुलभ होनेपर भी तृप्ति नहीं होती है ॥ ४ ॥ अन्तमें वे नर-नारी क्रमसे छींक और जृंभाके वश शरत्कालीन मेघके समान विलीन होकर यदि मिथ्यादृष्टि हुए तो भवनत्रिक देवोंमें और यदि सम्यग्दृष्टि हुए तो सौधर्मादिक देवोंमें उत्पन्न होते हैं ॥ ५ ॥

---

१ प पाखंडा। २ ब नपि च शत्रवः। ३ ब नीतवादित्र°। ४ [°न्तः अन्योन्यं] ५ आ प आहारो ६ आ प रंगिदये।

पञ्चस्वद्रिषु नीलेषु निषधेषु कुरुष्वपि । वर्धमानोभयान्ताभ्यां प्रथमा नियु [य] ता समा ॥ ३५
हिमवद्रुग्मिशैलेषु रम्यकेषु हरिष्वपि । वर्धमानोभयान्ताभ्यां द्वितीया नियु [य] ता समा ॥ ३६
क्षुल्लहिमाद्रेषु तत्पार्श्वासु च भूमिषु । तृतीया तु समा नित्यमन्तरद्वीपकेषु च ॥३७
पल्योपमाष्टमे भागे जायन्ते कुलकूप्ररा:[1] । चतुर्दश परस्तेभ्य आदिराजोऽपि जायते ॥ ३८

उक्तं चार्षे [आ. पु. ३,५५-५७; ३-६३ आदि]—

ततस्तृतीयकालेऽस्मिन् व्यतिक्रामत्यनुक्रमात् । पल्योपमाष्टभागस्तु यदास्मिन् परिशिष्यते ॥ ६
कल्पानोकहधीर्याणां क्रमादेव परिच्युतौ । ज्योतिरङ्गास्तदा वृक्षा गता मन्दप्रकाशताम् ॥ ७
पुष्पदन्तावथाषाढ्यां पौर्णिमास्यां[2] स्फुरत्प्रभौ । सायाह्ने प्रादुरास्तां तौ गगनोभयभागयोः ॥ ८
प्रतिश्रुतिरितिख्यातस्तदाकुलधरोऽग्रिमः । विभ्रल्लोकातिगं तेजः प्रजानां नेत्रमुद्बभौ[3] ॥ ९
पल्यस्य दशमो भागस्तस्यायुर्जिनदेशितम् । धनुःसहस्रमुत्सेधः शतैरधिकमष्टभिः ॥ १०
अदृष्टपूर्वौ तौ दृष्ट्वा स भीतान् भोगभूमिजान् । भीतेर्निर्वर्तयामास तत्स्वरूपमिति ब्रुवन् ॥ ११
एतौ तौ प्रतिदृश्येते सूर्यचन्द्रमसौ ग्रहौ । ज्योतिरङ्गप्रभापायात् कालह्रासवशोद्भवात् ॥ १२

पांच नील पर्वतोंपर, पांच निषधपर्वतोंपर और पांच कुरुक्षेत्रोंमें भी वर्धमान उभय अन्तोंसे प्रथम (सुषमासुषमा) काल नियत है ॥ ३५ ॥ हिमवान् पर्वतोंपर, रुक्मि पर्वतोंपर, रम्यक क्षेत्रोंमें और हरिक्षेत्रोंमें भी वर्धमान उभय अन्तोंसे द्वितीय (सुषमा) काल नियत है ॥ ३६ ॥ शिखरी पर्वतोंपर, क्षुद्र हिमवान् पर्वतोंपर उनकी पार्श्वभूमियों (हैमवत और हैरण्यवत क्षेत्रों) में तथा अन्तरद्वीपोंमें भी सदा तृतीय (सुषमादुःषमा) काल रहता है ॥ ३७ ॥ तृतीय कालमें पल्योपमका आठवां भाग ($\frac{1}{8}$) शेष रह जानेपर [भरत और ऐरावत क्षेत्रोंके भीतर] चौदह (१४) कुलकर पुरुष उत्पन्न होते हैं। उनके पश्चात् भरतक्षेत्रमें आदिनाथ भी जन्म लेते हैं ॥ ३८ ॥ आर्ष (आदिपुराण)में कहा भी है —

तत्पश्चात् अनुक्रमसे इस तृतीय कालके वीतनेपर जब उसमें पल्योपमका आठवां भाग ($\frac{1}{8}$) शेष रहता है तब क्रमसे कल्पवृक्षोंकी शक्तियोंके क्रमशः क्षीण हो जानेपर ज्योतिरंग कल्पवृक्ष मंदप्रकाशरूपताको प्राप्त हो जाते हैं ॥ ६-७ ॥ तदनन्तर आषाढी पूर्णिमाके दिन सायंकालमें आकाशके उभय (पूर्व-पश्चिम) भागोंमें प्रभासे प्रकाशमान वे पुष्पदन्त (सूर्य व चन्द्र) प्रकट हुए ॥ ८ ॥ उस समय अलौकिक तेजको धारण करनेवाला प्रतिश्रुति इस नामसे प्रसिद्ध प्रथम कुलकर प्रजाके नेत्रके समान सुशोभित हुआ ॥ ९ ॥ जिन भगवान्के द्वारा उसकी आयु पल्यके दसवें भाग ($\frac{1}{10}$) प्रमाण तथा शरीरकी ऊंचाई एक हजार आठ सौ (१८००) धनुष मात्र निर्दिष्ट की गई है ॥ १० ॥ उस प्रतिश्रुति कुलकरने पूर्वमें कभी न देखे गये उन सूर्य-चन्द्रको देखकर भयभीत हुए प्रजाजनके भयको उक्त सूर्य-चन्द्रके स्वरूपको इस प्रकारसे बतलाकर दूर किया ॥११॥ ये सूर्य-चन्द्र ग्रह अब कालकी हानिके प्रभावसे ज्योतिरंग जातिके कल्पवृक्षोंकी

१ प °कुलकिन्नराः । २ ब पौर्णमास्यां । ३ आ. पु. नेत्रवद्बभौ ।

सदाप्यधिनभोभागं[1] भ्राम्यतोऽमू महाद्युती। न वस्ताभ्यां भयं किंचिदतो मा भैष्ट भद्रकाः ॥१३
इति तद्वचनात्तेषां प्रत्याश्वासो महानभूत्। मनौ याते दिवं तस्मिन् काले गलति च क्रमात् ॥ ३९
मन्वन्तरमसंख्येयवर्षकोटीर्व्यतीत्य च। सन्मतिः सन्मतिर्नाम्ना द्वितीयोऽभून्मनुस्तदा ॥ ४०
तस्यायुरममप्रख्यमासीत्संख्येयहायनम्। सहस्रं त्रिशतीयुक्तमुत्सेधो धनुषां मतः ॥ ४१
नभोऽङ्गणमथापूर्यं तारकाः प्रथकाशिरे। नात्यन्धकारकलुषां वेलां प्राप्य तमीमुखे ॥ ४२
अकस्मात्तारका दृष्ट्वा संभ्रान्तान् भोगभूभुवः। भीतिर्विचलयामास प्राणिहत्येव योगिनः ॥ ४३
स सन्मतिरनुध्याय क्षणं प्रावोचतार्यकान्। नोत्पातः कोऽप्ययं भद्रास्तन्मागात् भियो वशम् ॥४४
ज्योतिश्चक्रमिदं शश्वद् व्योममार्गे कृतस्थिति[2]। स्पष्टतामधुनायातं ज्योतिरङ्गप्रभाक्षयात् ॥४५
ज्योतिर्ज्ञानस्य बीजानि सोऽन्ववोचद्विदांवरः। अथ तद्वचनादार्या जाता सपदि निर्भयाः ॥ ४६
ततोऽन्तरमसंख्येयाः [3]कोटीरुल्लङ्घ्य वत्सरान्। तृतीयो मनुरत्रासीत् क्षेमंकरसमाह्वयः ॥ ४७
अटटप्रमितं तस्य बभूवायुर्महौजसः। देहोत्सेधश्च चापानाममुष्यासीच्छताष्टकम् ॥ ४८

प्रभाके विनष्ट हो जानेसे आकाशमें दिखने लगे हैं ॥ १२ ॥ अतिशय तेजके धारक वे दोनों सदा ही आकाशमें भ्रमण करते हैं। उनसे आप लोगोंको कुछ भी भय नहीं होना चाहिये। अत एव हे भद्र पुरुषो! आप लोग इनसे भयभीत न हो ॥ १३ ॥

प्रतिश्रुति कुलकरके इन वचनोंसे उन भोगभूमिज प्रजाजनोंको बड़ी सान्त्वना मिली। इस कुलकरके स्वर्गस्थ होनेके पश्चात् क्रमसे कालके व्यतीत होनेपर असंख्यात करोड़ वर्षोंको बिताकर उत्तम बुद्धिका धारक सन्मति नामका दूसरा कुलकर हुआ ॥ ३९-४० ॥ उसकी आयु अमम के बराबर असंख्यात वर्ष और शरीरकी ऊंचाई एक हजार तीन सौ (१३००) धनुष प्रमाण थी ॥ ४१ ॥ एक दिन रात्रिमें जब वेला (काल) सघन अन्धकारसे मलिन नहीं हुई थी तब तारागण आकाशरूपी आंगनको पूर्ण करके प्रकाशित हुए ॥ ४२ ॥ उस समय अकस्मात् ताराओंको देखकर उत्पन्न हुए भयने उन भोगभूमिजोंको इस प्रकार विचलित कर दिया जैसे कि प्राणिहिंसा योगियोंको विचलित कर देती है ॥ ४३ ॥ तब सन्मति कुलकरने क्षणभर विचार कर उन आर्योंसे कहा कि हे भद्र पुरुषो! यह कोई उपद्रव नहीं प्राप्त हुआ है। इसलिये आप लोग उनसे भयको प्राप्त न हों ॥ ४४ ॥ निरन्तर आकाशमार्गमें अवस्थित रहनेवाला यह ज्योतिर्मण्डल इस समय ज्योतिरंग जातिके कल्पवृक्षोंकी प्रभाके क्षीण हो जानेसे स्पष्टतया दृष्टि-गोचर होने लगा है ॥ ४५ ॥ विद्वानोंमें श्रेष्ठ उस सन्मति कुलकरने उन्हें ज्योतिषी देवों विषयक ज्ञानके कुछ बीज भी बतलाये। उसके इस कथनसे आर्यगण शीघ्र ही भयसे निर्मुक्त हो गये॥४६॥

तत्पश्चात् असंख्यात करोड़ वर्ष मात्र अन्तरको बिताकर यहां क्षेमंकर नामका तीसरा कुलकर हुआ ॥ ४७ ॥ उस महान् तेजस्वी कुलकरकी आयु अटट प्रमाण और शरीरकी ऊंचाई

---

१ ब तदाप्यधि°। २ आ प कृतस्थितिः। ३ आ प कोटि।

पुरा किल मृगा भद्राः प्रजानां हस्तलालिताः । तदा तु विकृतिं[1] मेजुर्व्याप्तास्या भीषणस्वनाः[2] ॥
तेषां विक्रियया सान्तर्गर्जया तत्रसुः प्रजाः । इमे भद्रमृगाः पूर्वं संवसन्तोऽनुपद्रवाः ॥ ५०
इदानीं तु विना हेतोः शृङ्गैरभिभवन्ति नः । इति तद्वचनाज्जातसौहार्दो मनुरब्रवीत् ॥ ५१
कर्तव्यो नैषु विश्वासो बाधाः कुर्वन्त्युपेक्षिताः । इत्याकर्ण्य वचस्तस्य परिजह्रुस्तदा मृगान् ॥ ५२
मन्वन्तरमसंख्येयाः समाकोटीर्विलङ्घ्य च । अग्रेसरः सतामासीन्मनुः क्षेमंधराह्वयः ॥ ५३
त्रुटिताब्दमितं तस्य बभूवायुर्महात्मनः । शतानि सप्त चापानां सप्ततिः[3] पञ्च चोच्छ्रितिः[4] ॥ ५४
यदा प्रबलतां याताः पाकसत्त्वा महाक्रुधः । तदा लकुटयष्ट्याद्यैः[5] स रक्षाविधिमन्वशात् ॥ ५५
पुनर्मन्वन्तरं तत्र संजातं पूर्ववत् क्रमात् । मनुः सीमंकरो जज्ञे प्रजानां पुण्यपाकतः ॥ ५६
कमलप्रमितं तस्य बभूवायुर्महाधियः । शतानि सप्त पञ्चाशदुच्छ्रायो[6] धनुषां मतः ॥ ५७
कल्पाङ्घ्रिपा यदा जाता विरला मन्दकाः फलैः । तदा तेषु विसंवादो बभूवैषां परस्परम् ॥ ५८

आठ सौ (८००) धनुष मात्र थी ॥ ४८ ॥ जो भद्र मृग (पशु) पहिले प्रजाके हाथों द्वारा परिपालित थे वे उस समय मुंह फाड़कर भयानक शब्दको करते हुए विकारको प्राप्त हो चुके थे ॥ ४९ ॥ उनके इस अन्तर्गर्जना युक्त विकारसे प्रजाजन भयभीत होने लगे । [तब उन्होंने क्षेमंकर कुलकरसे निवेदन किया कि] ये भद्र मृग पहिले यहां विना किसी प्रकारके उपद्रवके रहते थे । किन्तु अब वे अकारण ही हम लोगोंको सीगोंसे अभिभूत करते हैं । इस प्रकारके उन आर्योंके वचनोंसे सौहार्दको प्राप्त होकर वह कुलकर बोला कि अब इनके विषयमें विश्वास न करो, इनकी यदि उपेक्षा की जायगी तो वे बाधा पहुंचा सकते हैं । तब उसके इन वचनोंको सुनकर आर्य जन उन मृगोंका परिहार करने लगे ॥ ५०–५२ ॥

अनन्तर असंख्यात करोड़ वर्षों प्रमाण मन्वन्तरका अतिक्रमण करके सज्जनोंमें श्रेष्ठ क्षेमंधर नामका चौथा कुलकर उत्पन्न हुआ ॥ ५३ ॥ उस महात्माकी आयु त्रुटित वर्ष प्रमाण और शरीरकी ऊंचाई सात सौ पचत्तर (७७५) धनुष मात्र थी ॥ ५४ ॥ जब ये क्रूर प्राणी अतिशय क्रोधित होकर प्रबलता (क्रूरता) को प्राप्त होने लगे तब क्षेमंधर कुलकरने उनसे दण्ड व लाठी आदिकोंके द्वारा अपनी रक्षा करनेकी विधि बतलायी ॥ ५५ ॥

तत्पश्चात् पहिलेके समान क्रमसे असंख्यात करोड़ वर्षों प्रमाण मन्वन्तर हुआ, अर्थात् क्षेमंधर कुलकरके स्वर्गस्थ हो जानेपर असंख्यात करोड़ वर्षों तक कोई कुलकर नहीं हुआ । उसके पश्चात् प्रजाजनोंके पुण्योदयसे सीमंकर नामका पांचवां कुलकर उत्पन्न हुआ ॥५६॥ उस महाबुद्धिमान् कुलकरकी आयु 'कमल' प्रमाण और शरीरकी ऊंचाई सात सौ पचास (७५०) धनुष मात्र मानी गई है ॥ ५७ ॥ उस समय जब कल्पवृक्ष विरल हो गये अर्थात् जहां तहां संख्यामें वे थोड़े-से रह गये तथा फलोंसे मन्द भी पड़ गये तब उनके विषयमें इन आर्यगणोंके बीच

---

१ प विहृतिं । २ प भीषणा° । ३ आ प सप्ततिं । ४ आ प पंचकोच्छ्रितिम् । ५ आ प यष्टाद्यैः । ६ आ ब °दुच्छ्रायो ।

ततो मनुरसौ मत्वा वाचा सीमविधिं व्यधात् । अतः सीमंकराख्यां तैर्लब्धोऽन्वर्थतां गताम् ॥
पुनर्मन्वन्तरं प्राग्ववतिलङ्घ्य महोदयः । मनुः सीमंधरो नाम्ना समजायत पुण्यधीः ॥ ६०
नलिनप्रमितायुष्को नलिनास्येक्षणद्युतिः । धनुषां पञ्चवर्गाग्रमुच्छ्रितः शतसप्तकम् ॥ ६१
अत्यन्तविरला जाताः क्ष्माजा मन्दफला यदा । नृणां महान्[1] विसंवादः केशाकेशि तदाऽवृधत्[2] ॥६२
क्षेमवृत्तिं ततस्तेषां मन्वानः स मनुस्तदा । सीमानि तरुगुल्मादिचिह्नितान्यकरोत् कृती ॥ ६३
ततोऽन्तरमभूद्भूयोऽप्यसंख्या वर्षकोटयः । तदन्तरव्यतिक्रान्तावभूद्विमलवाहनः ॥ ६४
पद्मप्रमितमस्यायुः पद्माश्लिष्टतनोरभूत् । धनुःशतानि सप्तैव तनूत्सेधोऽस्य वर्णितः ॥ ६५
तदुपज्ञं गजादीनां बभूवारोहणक्रमः । कुदाराङ्कुशपर्याणमुखभाण्डाद्युपक्रमैः[3] ॥ ६६
पुनरन्तरमत्रासीदसंख्येयाब्दकोटयः । ततोऽष्टमो मनुर्जातश्चक्षुष्मानिति शब्दितः ॥ ६७

परस्परमें विवाद होने लगा ॥ ५८ ॥ तब उस कुलकरने इस विवादको देखकर वचन मात्रसे उनकी सीमाका विधान बना दिया, अर्थात् उनके उपयोगके लिये उसने कुछ अलग अलग वृक्षोंका निर्देश कर दिया । इसी कारण उन आर्यगणोंने इसका ' सीमंकर ' यह सार्थक नाम प्रसिद्ध कर दिया ॥ ५९ ॥

तत्पश्चात् फिरसे पहिलेके ही समान असंख्यात करोड़ वर्षों तक कोई कुलकर नहीं हुआ । तब कहीं इतने अन्तरके पश्चात् महान् अभ्युदयसे सम्पन्न पवित्रबुद्धि सीमंधर नामका छटा कुलकर उत्पन्न हुआ ॥ ६० ॥ कमलके समान मुख एवं नेत्रोंकी कान्तिसे सुशोभित उस कुलकरकी आयु ' नलिन ' प्रमाण तथा शरीरकी ऊंचाई पांचके वर्ग (५×५=२५) से अधिक सात सौ (७२५) धनुष मात्र थी ॥ ६१ ॥ उस समय जब कल्पवृक्ष बहुत ही थोड़े रह गये और उनकी फलदानशक्ति भी अतिशय मन्द पड़ गई तब उन भोगभूमिज मनुष्योंके बीच केवल महाविसंवाद ही नहीं छिड़ा, बल्कि आपसमें एक दूसरेके बालोंको खींचकर मार पीटकी भी वृद्धि होने लगी ॥ ६२ ॥ तब उस विद्वान् कुलकरने उन आर्योंके कल्याणको महत्त्व देकर उक्त कल्पवृक्षोंकी सीमाओंको – जिन्हें सीमंकर कुलकरने वचन मात्रसे ही बद्ध किया था – अन्य वृक्ष एवं झाड़ी आदिकोंसे चिह्नित कर दिया ॥ ६३ ॥

तत्पश्चात् फिरसे भी असंख्यात करोड़ वर्ष प्रमाण मन्वन्तर हुआ, तब कहीं इतने अन्तरके बीत जानेपर विमलवाहन नामका सातवां कुलकर प्रादुर्भूत हुआ ॥ ६४ ॥ लक्ष्मीसे आलिंगित ऐसे सुन्दर शरीरको धारण करनेवाले इस कुलकरकी आयु ' पद्म ' प्रमाण तथा शरीरकी ऊंचाई सात सौ (७००) धनुष मात्र कही गई है ॥ ६५ ॥ इस समय विमलवाहन कुलकरके उपदेशानुसार कुदार, अंकुश, पलान और मुखभाण्ड (तोबरा) आदिकी प्रवृत्तिपूर्वक हाथी आदिकोंकी सवारी प्रारम्भ हो गई थी ॥ ६६ ॥

इसके पश्चात् यहां फिरसे भी असंख्यात करोड़ वर्ष प्रमाण अन्तर हुआ, तब कहीं

---

१ आ प महा । २ आ ब 'केशि तदा वृदंत्, प 'केशि वृदंत् । ३ ब कुदारांकुश° ।

पद्माङ्गप्रमितायुष्कश्चापानां पञ्चसप्ततिम् । षट्छतान्यप्युदग्रश्रीरुच्छ्रिताङ्गो बभूव सः ॥ ६८
तस्य कालेऽभवत्सेवां क्षणं पुत्रमुखेक्षणम् । अदृष्टपूर्वमार्याणां महदुत्रासकारणम् ॥ ६९
ततः सपदि संजातसाध्वसानार्यकांस्तदा । तद्भायात्म्योपदेशेन स संत्रासमधो[धौ]ऽक्षयत् ॥ ७०
पुनरप्यन्तरं तावद्वर्षकोटीविलङ्घ्य सः । [1]यशस्वानित्यभून्नाम्ना यशस्वी नवमो मनुः ॥ ७१
कुमुदप्रमितं तस्य परमायुर्महोयसः । षट्छतानि च पञ्चाशद्धनूंषि वपुरुच्छ्रितिः ॥ ७२
तस्य काले प्रजा जन्यमुखालोकपुरस्सरम् । कृताशिषः क्षणं स्थित्वा लोकान्तरमुपागमन् ॥ ७३
ततोऽन्तरमतिक्रम्य तत्प्रायोग्याब्दसंमितम् । अभिचन्द्रोऽभवन्नाम्ना चन्द्रसौम्याननो मनुः ॥ ७४
कुमुदाङ्गप्रमायुष्को ज्वलन्मकुटकुण्डलः । पञ्चवर्गाग्रषट्चापशतोत्सेधः स्फुरत्तनुः ॥ ७५
तस्य काले प्रजास्तोकमुखं वीक्ष्य सकौतुकम् । आशास्य क्रीडनं चक्रुर्निशि चन्द्राभिदर्शनैः ॥ ७६
पुनरन्तरमुल्लङ्घ्य तत्प्रायोग्यसमाशतैः । चन्द्राभ इत्यभूत् ख्यातश्चन्द्रास्यः कालविन्मनुः ॥ ७७

चक्षुष्मान् नामका आठवां कुलकर उत्पन्न हुआ ॥ ६७ ॥ वह उन्नत शोभाका धारक कुलकर 'पद्मांग' प्रमाण आयुसे संयुक्त तथा छह सौ पचासर (६७५) धनुष मात्र ऊंचे शरीरवाला था ॥६८॥ उसके समयमें जिन आर्यगणोंने [प्रसवके साथ ही मरणको प्राप्त हो जानेके कारण] पहिले कभी सन्तानका मुख नहीं देखा था वे अब क्षणभर जीवित रहकर उसका मुख देखने लगे थे। यह उन्हें महान् भयका कारण बन गया था ॥ ६९ ॥ इस कारण उस समय चक्षुष्मान् कुलकरने शीघ्र ही भयसे संत्रस्त उन आर्यगणोंको सन्तानविषयक यथार्थताका उपदेश देकर उनके भयको दूर कर दिया था ॥ ७० ॥

उसके बाद फिरसे भी उतने (असंख्यात) करोड़ वर्षों प्रमाण कुलकरविच्छेदको बिताकर यशस्वान् नामका कीर्तिशाली नौवां कुलकर उत्पन्न हुआ ॥७१॥ उस तेजस्वी महापुरुषकी उत्कृष्ट आयु 'कुमुद' प्रमाण और शरीरकी ऊंचाई छह सौ पचास (६५०) धनुष मात्र थी ॥ ७२॥ उसके समयमें प्रजाजन सन्तानके मुखको देखकर और क्षणभर स्थित रहकर 'जीव, नन्द' आदि आशीर्वचनोंको कहते हुए परलोकको प्राप्त होते थे ॥ ७३ ॥

तत्पश्चात् उसके योग्य अर्थात् असंख्यात करोड़ वर्षों प्रमाण कुलकरविच्छेदको बिताकर चन्द्रमाके समान सौम्य मुखवाला अभिचन्द्र नामका दसवां कुलकर हुआ ॥७४॥ चमकते हुए मुकुट एवं कुण्डलोंसे विभूषित वह कुलकर 'कुमुदांग' प्रमाण आयुका धारक तथा पांचके वर्ग (२५) से अधिक छह सौ (६२५) धनुष मात्र ऊंचे देदीप्यमान शरीरसे सुशोभित था ॥ ७५ ॥ उसके समयमें प्रजाजन कौतूहलपूर्वक सन्तानके मुखको देखकर और आशीर्वाद देकर रात्रिमें चन्द्रमा आदिको दिखाते हुए उसको खिलाने लगे थे ॥ ७६ ॥

तत्पश्चात् फिर भी उसके योग्य सैकड़ों वर्षों प्रमाण मनुविच्छेदको लांघकर चन्द्रके समान सुन्दर मुखवाला समयज्ञ (समयकी गतिका जानकार) चन्द्राभ नामक ग्यारहवां प्रसिद्ध

---

१ आ ब यशस्वाभिख्य° ।

[1]नयुतप्रमितायुष्को विलसल्लक्षणोज्ज्वलः । धनुषां षट्छतान्युच्चः प्रोद्यदर्कसमद्युतिः ॥ ७८
तस्य कालेऽतिसंप्रीताः पुत्राशासनदर्शनैः । तुष्टिभः सह स्म जीवन्ति दिनानि कतिचित्प्रजाः ॥ ७९
मरुद्देवोऽभवत्कान्तः कुलधृत्सदनन्तरम् । स्वोचितान्तरमुल्लङ्घ्य प्रजानामुत्सवो दृशाम् ॥ ८०
शतानि पञ्च पञ्चाग्रां सप्ततिं च समुच्छ्रितिः । धनूंषि [2]नयुताङ्गनयुर्विवस्वानिव भास्वरः ॥८१
तस्य काले प्रजा दीर्घं प्रजाभिः स्वाभिरन्विताः । प्राणिषुस्तन्मुखालोकतदङ्गस्पर्शनोत्सवैः ॥ ८२
नौद्रोणीसंक्रमादीनि जलदुर्गेष्वकारयत् । गिरिदुर्गेषु सोपानपद्धतीः सोऽधिरोहणे ॥ ८३
ततः प्रसेनजिज्जज्ञे [3] प्रभविष्णुर्मनुर्महान् । कर्मभूमिस्थितावेवमभ्यर्णायां शनैः शनैः ॥ ८४
[4]पर्वप्रमितमाम्नातं मनोरस्यायुरञ्जसा । शतानि पञ्च चापानां शतार्धं च तदुच्छ्रितिः ॥ ८५
तदाभूदर्भकोत्पत्तिर्जरायुपटलावृता । ततस्तत्कर्षणोपायं स प्रजानामुपादिशत् ॥ ८६
तदनन्तरमेवाभून्नाभिः कुलधरः सुधीः । युगादिपुरुषैः पूर्वैरूढां धुरमुदूहन् ॥ ८७
पूर्वकोटिमितं तस्य परमायुस्तनूच्छ्रितिः । शतानि पञ्च चापानां पञ्चवर्गाधिकानि वै ॥ ८८

कुलकर हुआ ॥ ७७ ॥ सुन्दर लक्षणोंसे उज्ज्वल एवं उदित होते हुए सूर्यके समान कान्तिवाला वह कुलकर 'नयुत' प्रमाण आयुका धारक और छह सौ (६००) धनुष ऊंचा था ॥७८॥ उसके समयमें प्रजाजन पुत्रोंके दर्शन एवं आश्वासनसे अतिशय प्रीतिको प्राप्त होकर सन्तानके साथ कुछ दिन जीवित रहने लगे थे ॥७९॥

उसके पश्चात् अपने योग्य मन्वन्तरको लांघकर प्रजाजनोंके नेत्रोंको आनन्दित करनेवाला रमणीय मरुद्देव नामका बारहवां कुलकर उत्पन्न हुआ ॥८०॥ यह कुलकर सूर्यके समान तेजस्वी था। उसके शरीरकी ऊंचाई पांच सौ पचत्तर (५७५) धनुष और आयु 'नयुतांग' प्रमाण थी ॥८१॥ उसके समयमें प्रजाजन अपनी सन्तानके साथ बहुत समय तक स्थित रहकर उसके मुखावलोकन और अंगस्पर्शरूप उत्सवोंसे अतिशय प्रीतिको प्राप्त होते थे ॥८२॥ उसने जलमय दुर्गम स्थानों (नदी-समुद्र आदि) में जानेके लिये नाव, द्रोणी (छोटी नाव) एवं पुल आदिका तथा पर्वतादिरूप दुर्गम स्थानोंके ऊपर चढ़नेके लिये सीढ़ियोंकी प्रणालीका निर्माण कराया ॥८३॥

तत्पश्चात् धीरे धीरे कर्मभूमिकी स्थितिके निकट होनेपर महान् प्रभावशाली प्रसेनजित् नामका तेरहवां कुलकर उत्पन्न हुआ ॥ ८४॥ इस कुलकरकी आयु निश्चयतः पर्व प्रमाण और शरीरकी ऊंचाई पांच सौ पचास (५५०) धनुष मात्र थी ॥८५॥ उस समय सन्तानकी उत्पत्ति जरायुपटलसे वेष्टित होने लगी थी, इसलिये उसने प्रजाजनोंको उक्त जरायुपटलके छेदनेका उपाय निर्दिष्ट किया था ॥८६॥

उसके अनन्तर ही युगादि पुरुषों (पूर्व कुलकरों) के द्वारा धारण किये गये भारको धारण करनेवाला बुद्धिमान् नाभिराय नामका चौदहवां कुलकर हुआ ॥८७॥ उसकी उत्कृष्ट आयु पूर्वकोटि प्रमाण तथा शरीरकी ऊंचाई पांचके वर्ग (२५) से अधिक पांच सौ (५२५)

---

१ ब नवुत° । २ ब नवुतं° । ३ ब °जिदजज्ञे । ४ प पूर्व ।

तस्य काले सुतोत्पत्तौ नाभिनालमदृश्यत । स तच्छिकर्तनोपायमादिशन्नाभिरित्यभूत् ॥ ८९
तस्यैव काले जलदाः कालिकाः कर्बुरत्विषः । प्रादुरासन्नभोभागे सान्द्रा सेन्द्रशरासनाः ॥ ९०
शनैःशनैर्विवृद्धानि क्षेत्रेष्वविरलं तदा । सस्यान्यकृष्टपच्यानि[1] नानाभेदानि सर्वतः ॥ ९१
प्रजानां पूर्वसुकृतात् कालादपि च तादृशात् । सुपक्वानि यथाकालं फलदायीनि रेजिरे ॥ ९२
तदा पितृव्यतिक्रान्तावपत्यानीव तत्पदम् । कल्पवृक्षोचितं स्थानं तान्यध्याशिषत स्फुटम् ॥९३
नातिवृष्टिरवृष्टिर्वा तदासीत् किंतु मध्यमा । वृष्टिस्तत्सर्वधान्यानां फलावाप्तिरविप्लुता ॥ ९४
षष्टिकाकलमव्रीहियवगोधूमकङ्गवः । शामाककोद्रवोदारनीवारवरकास्तथा ॥ ९५
तिलातस्यौ मसूरश्च सर्षपो धान्यजीरके । मुद्गमाषाढकीराजमाषनिष्पावकाश्चणः ॥ ९६
कुलत्थत्रिपुटा चेति धान्यभेदास्त्विमे मताः । सकुसुम्भाः सकार्पासाः प्रजाजीवनहेतवः ॥ ९७
उपभोग्येषु धान्येषु सत्स्वप्येषु तदा प्रजाः । तदुपायमजानानाः स्वतोऽमूर्मुहुर्मुहुः[2] ॥ ९८
कल्पद्रुमेषु कात्स्न्र्येन प्रलीनेषु निराश्रयाः । युगस्य परिवर्तेऽस्मिन् अभूवन्नाकुला कुलाः ॥ ९९
तीव्रायामशनायायामुदीर्णाहारसंज्ञकाः । जीवनोपायसंसीतिव्याकुलीकृतचेतसः ॥ १००

धनुष मात्र थी ॥८८॥ उसके समयमें सन्तानकी उत्पत्तिके समय नाभिनाल दिखाई देने लगा था। चूंकि उसके छेदनेका उपाय इस कुलकरने बतलाया था, अतः वह 'नाभि' इस नामसे प्रसिद्ध हुआ ॥८९॥ आकाशमण्डलमें इन्द्रधनुषके साथ कर्बुर (भूरा रंग) कान्तिवाले काले घने मेघोंका प्रादुर्भाव उसके ही समयमें हुआ था ॥९०॥ उस समय खेतोंमें सब ओर अनेक प्रकारके धान्य (अनाज)के अंकुर विना जोते व विना बोये ही धीरे धीरे सघनरूपमें वृद्धिको प्राप्त हो रहे थे। वे समयानुसार प्रजाजनोंके पूर्व पुण्यके वश तथा उस प्रकारके कालके ही प्रभावसे भी पक करके फल देनेके योग्य हो गये थे ॥९१-९२॥ उस समय पिताके स्वर्गस्थ होनेपर जैसे सन्तान उसके स्थानको ग्रहण कर लेती है वैसे ही उन अनाजोंने पूर्वोक्त कल्पवृक्षोंका उचित स्थान ग्रहण कर लिया था ॥९३॥

उस समय न अतिवृष्टि होती थी और न अवृष्टि (वर्षाभाव) भी, किन्तु मध्यम वृष्टि होती थी; जिससे विना किसी प्रकारके उपद्रवके समस्त अनाजोंकी फलप्राप्ति होती थी ॥९४॥ षष्ठिक (साठ दिनोंमें पककर तैयार होनेवाली साठी धान), कलम, व्रीहि, जौ, गेहूं, कंगु (कांगणी), श्यामाक (समा), कोद्रव (कोदों), उदार नीवार, वरक, तिल, अलसी, मसूर, सरसों, धनियां, जीरा, मूंग, उड़द, आढकी (अरहर), रोंसा, निष्पावक (मोठ), चना, कुलथी और तेवरा ये अनाजके भेद माने गये हैं। कुसुम्भ और कपासके साथ ये सब प्रजाजनोंकी आजीविकाके कारण माने गये हैं ॥९५-९७॥ उपभोगके योग्य इन अनाजोंके होनेपर भी उनके उपायको न जाननेवाली प्रजा उस समय बार बार मोहको प्राप्त होती थी ॥९८॥ युगके इस परिवर्तनमें जब कल्पवृक्ष पूर्णतया नष्ट हो गये तब निराश्रय होकर प्रजाके लोग आकुलताको प्राप्त हुए ॥९९॥ उस समय आहारसंज्ञाकी उदीरणासे तीव्र भूखके लगनेपर जीवित रहनेके उपायके विषयमें सन्देहको प्राप्त हुए उन प्रजाजनोंके चित्त अत्यन्त व्याकुल हो

१ प सस्याप्रकृष्ट° । २ आ ब स्वतोमूर्मुहुर्मुहुः, प स्वतोभूर्मुहुर्मुहुः ।

युगमुख्यमुपासीना नाभिं मनुमपश्चिमम्[1] । ते तं विज्ञापयामासुरिति दीनगिरो नराः ॥ १०१
जीवामः कथमेवाद्य नाथानाथा विना द्रुमैः । कल्पदायिभिराकल्पमविस्मार्यैरपुण्यकाः ॥ १०२
इमे केचिदितो देव तरुभेदाः समुत्थिताः । शाखाभिः फलनम्राभिराह्वयन्तीव नोऽधुना ॥ १०३
किमिमे परिहर्तव्याः किं वा भोग्यफला इमे । फलेग्रहीनिमेऽस्मान् वानिग्रहन्त्यनुपान्ति वा ॥१०४
अमीषामुपशल्येषु[2] केप्यमी तृणगुल्मकाः । फलनम्रशिखा भान्ति विश्वदिक्कमितोऽमुतः ॥ १०५
क एषामुपयोगः स्याद्विनियोज्याः कथं नु वा । किमिमे स्वैरसंग्राह्या न वेतीदं वदाद्य नः ॥ १०६
त्वं देव सर्वमप्येतद्वेत्सि नाभेऽनभिज्ञकाः । पृच्छामो वयमद्यार्तास्ततो ब्रूहि प्रसीद नः ॥ १०७
इति कर्तव्यतामूढाननतिभीतांस्तदार्यकान् । नाभिर्न भेयमित्युक्त्वा[3] व्याजहार पुनः स तान् ॥१०८
इमे कल्पतरुच्छेदे द्रुमाः पक्वफलानताः । युष्मानद्यानुगृह्णन्ति पुरा कल्पद्रुमा यथा ॥ १०९
[4]भद्रकास्तदिमे भोग्याः कार्या न भ्रान्तिरत्र वः । अमी च परिहर्तव्या दूरतो विषवृक्षकाः ॥ ११०
इमाश्च नामौषधयः स्तम्बकर्यादयो मताः । एतासां भोज्यमन्नाद्यं व्यञ्जनाद्यैः[5] सुसंस्कृतम् ॥१११

उठे थे ॥१००॥ तब उन सबने युगके नेता स्वरूप अन्तिम कुलकर नाभिरायके समीप जाकर दीन वचनोंमें उनसे इस प्रकार निवेदन किया ॥१०१॥

हे नाथ ! जो कल्पवृक्ष कल्पित (इच्छित) वस्तुओंके देनेवाले थे और इसीलिये जिनको कल्पकाल पर्यंत कभी भुलाया नहीं जा सकता है; उनके विना आज हम अनाथ हुए पापी जन किस प्रकारसे जीवित रहें ? ॥१०२॥ हे देव ! इधर जो ये कितने ही विभिन्न जातिके पेड़ उत्पन्न हुए हैं वे फलभारसे नम्रीभूत हुई अपनी शाखाओंके द्वारा मानों इस समय हमें बुला ही रहे हैं। क्या इनको छोड़ा जाय, अथवा इनके फलोंका उपयोग किया जाय ? फलोंके ग्रहण करनेपर ये हमारा निग्रह करेंगे अथवा पालन करेंगे ? ॥१०३-१०४॥ इधर उन वृक्षोंके समीपकी भूमिमें सब ओर फलोंसे नम्र हुई शिखाओंसे सुशोभित जो ये कितनी ही क्षुद्र झाडियां शोभायमान हो रही हैं उनका क्या उपयोग हो सकता है और किस प्रकारसे वे काममें लायी जा सकती हैं, क्या इनका इच्छानुसार संग्रह किया जा सकता है अथवा नहीं, इन सब बातोंको आज हमें बतलाइये ॥१०५-१०६॥ हे नाभिराय देव ! आप इस सभीको जानते हैं और हम इससे अनभिज्ञ हैं, इसीलिये हम आज दुखित होकर आपसे पूछ रहे हैं। अत एव आप प्रसन्न होकर इन सब बातोंको हमें समझाइये ॥१०७॥

इस प्रकार कर्तव्य-अकर्तव्यके विषयमें विमूढ होकर अत्यन्त भयको प्राप्त हुए उन आर्य पुरुषोंको 'आप लोग भयभीत न हो' ऐसा कहकर नाभिराय इस प्रकार बोले ॥१०८॥ कल्पवृक्षोंके नष्ट हो जानेपर फलोंके भारसे नम्रीभूत हुए ये जो वृक्ष उत्पन्न हुए हैं वे आप लोगोंका इस समय उसी प्रकारसे उपकार करेंगे जिस प्रकार कि पहिले कल्पवृक्ष किया करते थे ॥१०९॥ इसलिये हे भद्र पुरुषो ! इनका उपयोग कीजिए, इनके विषयमें आप किसी प्रकारका सन्देह न करें। परन्तु ये जो सामने विषवृक्ष हैं उनका दूरसे ही परित्याग कीजिये ॥११०॥ इनके अतिरिक्त ये स्तम्बकरी आदि औषधियां मानी गई हैं। व्यंजन आदिकोंसे सुसंस्कृत किये गये

---

१ प मनुं पश्चिमम् । २ प्रतिषु मुपशल्येषु । ३ प्रतिषु नाभिर्नाभेय° । ४ प भद्रिका । ५ आदिषु. व्यञ्जनाद्यः ।

स्वभावमधुराश्चैते दीर्घाः पुण्ड्रेक्षुदण्डकाः[1] । रसीकृत्य प्रपातव्या दन्तैर्यन्त्रैश्च पीडिताः ॥ ११२
गजकुम्भस्थले तेन मृदा निर्वर्तितानि[2] च । पात्राणि विविधान्येषां स्थाल्यादीनि दयालुना ॥ ११३
इत्याद्युपायकथनैः प्रीताः सत्कृत्य तं मनुम् । भेजुस्तद्दर्शितां वृत्तिं प्रजाः कालोचितां तदा ॥ ११४
प्रजानां हितकृद् भूत्वा भोगभूमिस्थितिच्युतौ । नाभिराजस्तदोद्भूतो भेजे कल्पतरुस्थितिम् ॥ ११५
पूर्वं व्यावर्णिता ये ये प्रतिश्रुत्यादयः क्रमात् । पुराभवे बभुवुस्ते विदेहेषु महान्वयाः ॥ ११६
कुशलैः पात्रदानाद्यैः अनुष्ठानैर्यथोचितैः । सम्यक्त्वग्रहणात्पूर्वं बध्वायुर्भोगभूभुवाम् ॥ ११७
पश्चात् क्षायिकसम्यक्त्वमुपादाय जिनान्तिके । अत्रोदपप्तत स्वायुरन्ते ते श्रुतपूर्विणः ॥ ११८
इमं नियोगमाध्याय प्रजानामित्युपादिशन् । केचिज्जातिस्मरास्तेषु केचिच्चावधिलोचनाः ॥११९
प्रजानां जीवनोपायमननान्मनवो मताः । आर्याणां कुलसंस्त्यायकृतेः[3] कुलकरा इमे ॥ १२०

इनके अन्न आदिका भोजन करना चाहिए ॥१११॥ स्वभावसे मीठे ये जो दण्डके समान लंबे पौंडा और ईखके पेड़ हैं उनको दांतोंसे अथवा कोल्हू आदि यंत्रोंसे पीड़ित करके रस निकालना चाहिए और उसका पान करना चाहिए ॥११२॥ उन दयालु नाभिराय कुलकरने हाथीके कुम्भस्थलपर थाली आदि अनेक प्रकारके पात्रोंको मिट्टीसे निर्मापित कराया ॥११३॥ तब इनको आदि लेकर और भी अनेक उपायोंके बतलानेसे प्रसन्नताको प्राप्त हुए प्रजाके लोग उक्त नाभिराय कुलकरका सत्कार करके उसके द्वारा निर्दिष्ट समयोचित आजीविकाको करने लगे ॥ ११४॥

भोगभूमि अवस्थाका विनाश होनेपर प्रजाके हितैषी होकर उत्पन्न हुए नाभिराय कुलकर उस समय कल्पवृक्षकी अवस्थाको प्राप्त हुए। अभिप्राय यह कि भोगभूमि अवस्थाके वर्तमान होनेपर जिस प्रकार अभीष्ट सामग्रीको देकर कल्पवृक्ष उन प्रजाजनोंका साक्षात् उपकार करते थे उसी प्रकार चूँकि नाभिराय कुलकरने तब भोगभूमि अवस्थाके विनष्ट हो जानेपर उक्त प्रजाजनोंको आजीविकाके उपाय बतलाकर उनका महान् उपकार किया था, अत एव वे उन्हें कल्पवृक्ष जैसे प्रमाणित हुए ॥११५॥ जिन जिन प्रतिश्रुति आदि कुलकर पुरुषोंका पूर्वमें क्रमसे वर्णन किया गया है वे पूर्व जन्ममें विदेह क्षेत्रोंके भीतर महान् कुलोंमें उत्पन्न हुए थे ॥११६॥ वे सम्यक्त्वग्रहण करनेके पहिले यथायोग्य पात्रदानादिस्वरूप पुण्यबन्धक अनुष्ठानोंके द्वारा भोगभूमिजोंकी आयुको बांधकर और फिर जिन भगवान्के समीपमें क्षायिक सम्यक्त्वको ग्रहण करके पूर्वश्रुतके धारी होते हुए आयुके अन्तमें यहां उत्पन्न हुए थे ॥११७–११८॥ उनमें कितने ही जातिस्मरणसे सहित थे और कितने ही अवधिज्ञानरूपी नेत्रके धारक थे। इसीलिये उन्होंने स्मरण करके प्रजाजनोंके लिये इस नियोगका उपदेश दिया था ॥११९॥ ये प्रजाजनोंकी आजीविकाके उपायका मनन करने अर्थात् जाननेके कारण 'मनु' तथा आर्यजनोंके कुलोंकी रचना करनेसे 'कुलकर' माने गए हैं ॥१२०॥ इसी प्रकार

---

१ प पुंगेक्षु° । २ आ प निर्वर्तितानि । ३ प संस्याय° ।

कुलानां धारणादेते मताः कुलधरा इति । युगादिपुरुषाः प्रोक्ता युगादौ प्रभविष्णवः ॥ १२१
वृषभस्तीर्थकृच्चैव कुलभृच्चैव संमतः[1] । भरतश्चक्रभृच्चैव कुलधृच्चैव[2] वर्णितः ॥ १२२
अत्राद्यैः पञ्चभिर्नृणां कुलकृद्भिः कृतागसाम् । हाकारलक्षणो दण्डः समवस्थापितस्तदा[3] ॥ १२३
हा-माकारौ च दण्डोऽन्यैः[4] पञ्चभिः संप्रवर्तितः । पञ्चभिस्तु ततः शेषैः हा-मा-धिक्कारलक्षणः ॥
शरीरदण्डनं चैव वधबन्धादिलक्षणम् । नृणां[5] प्रबलदोषाणां भरतेन नियोजितम् ॥ १२५
यदायुरुक्तमेतेषाममादिप्रसंख्यया । क्रियते तद्विनिश्चित्यै परिभाषोपवर्णनम् ॥ १२६
पूर्वाङ्गं वर्षलक्षाणामशीतिश्चतुरुत्तरा । तद्गुणितं भवेत्पूर्वं तत्कोटी पूर्वकोटयसौ ॥ १२७
पूर्वं चतुरशीतिघ्नं पर्वाङ्गं[6] परिभाष्यते । पूर्वाङ्गताडितं तत्तु पर्वाङ्गं[7] पर्वमिष्यते ॥ १२८
गुणाकारविधिः सोऽयं योजनीयो यथाक्रमम् । उत्तरेष्वपि संख्यानविकल्पेषु निराकुलम् ॥ १२९

ये कुलोंके धारण करनेसे 'कुलधर' माने गए हैं, तथा युगके आदिमें उत्पन्न होनेके कारण 'युगादिपुरुष' भी कहे गए है ॥१२१॥ वृषभदेव तीर्थकर भी माने गये है और कुलकर भी माने गये है। भरत राजा चक्रवर्ती भी कहे गए है और कुलधर भी ॥१२२॥

इनमेंसे आदिके पांच कुलकर पुरुषोने अपराध करनेवाले पुरुषोंके लिये उस समय 'हा' इस प्रकारका दण्ड स्थापित किया था, जिसका अभिप्राय कृत अपराधके प्रति केवल खेद मात्र प्रगट करना या उसका अनौचित्य बतलाना था ॥१२३॥ आगेके अन्य पांच कुलकरोंने अपराध करनेवालोंके लिये 'हा-मा' इस प्रकारके दण्डका उपयोग किया था। इसका अभिप्राय किये गये अपराध कार्यका अनौचित्य प्रगट करके आगेके लिये उसका निषेध करना था। शेष पांच कुलकर पुरुषोने उनके लिए 'हा-मा-धिक्' इस प्रकारका दण्ड स्थापित किया था। इसका अभिप्राय कृत कार्यका अनौचित्य प्रगट करके झिड़की देते हुए आगेके लिये उसका निषेध करना था ॥ १२४ ॥ भरत चक्रवर्तीने महान् अपराध करनेवाले मनुष्योंके लिये ताड़ना करने एवं बन्धनमें डालने आदिरूप शारीरिक दण्ड भी नियुक्त किया था ॥१२५॥

इन कुलकरोंकी पहिले जो 'अमम' आदिके प्रमाणसे आयु बतलायी गई है उसका निश्चय करनेके लिये उन परिभाषाओका वर्णन किया जाता है-चौरासी लाख (८४०००००) वर्षोंका एक पूर्वांग होता है। उसको वर्गित करनेपर (८४०००००^2 = ७०५६०००००००००) एक पूर्व, तथा उसे एक करोड़से गुणित करनेपर एक पूर्वकोटि कहा जाता है ॥१२६-१२७॥ चौरासीसे गुणित पूर्वको पर्वांग कहा जाता है और उस पर्वांगको पूर्वांगसे (८४ लाख) गुणित करनेपर जो संख्या प्राप्त हो वह पर्व मानी जाती है ॥१२८॥ आगेके संख्याभेदोंमें भी निराकुल होकर क्रमसे इसी गुणाकारविधिकी योजना करना चाहिये [जैसे- पर्वको चौरासी (८४) से गुणित करनेपर वह नयुतांग तथा इस नयुतांगको चौरासी लाख (८४०००००) से गुणित करनेपर वह नयुत कहा जाता है, इत्यादि। विशेषके लिये देखिये ति. प. गा. ४, २९५-३०८] ॥१२९॥

---

१ आ प °कृच्चैव संमतः । २ प कुलभृच्चैव । ३ आ प स्थापितः सदा । ४ आ प दण्डान्यैः । ५ ब नृणां । ६ प पूर्वांगं । ७ आ प पूर्वांगं

तेषां संख्यानभेदानां नामानीमान्यनुक्रमात् । कीर्त्यन्तेऽनादिसिद्धान्तपदरूढीनि यानि वै ॥ १३०
पूर्वाङ्गं च तथा पूर्वं पर्वाङ्गं पर्व साह्वयम् । नयुताङ्गं[1] परं तस्मान्नयुतं[2] च ततः परम् ॥ १३१
कुमुदाङ्गमतो विद्धि कुमुदाह्वमतः[3] परम् । पद्माङ्गं च तथा पद्मं नलिनाङ्गमतोऽपि च ॥ १३२
नलिनं कमलाङ्गं च तथान्यत् कमलं विदुः । तुटध्वङ्गं तुटितं चान्यदटटाङ्गमथाटटम् ॥ १३३
अममाङ्गमतो ज्ञेयममाख्यमतः परम् । हाहाङ्गं च तथा हाहा हूहूश्चैवं प्रतीयताम् ॥ १३४
लताङ्गं च लता हूं च महत्पूर्वं च तद्द्वयम् । शिरःप्रकम्पितं चान्यत्ततो हस्तप्रहेलितम् ॥ १३५
अचलात्मकमित्येवंप्रकारः[4] कालपर्ययः । संख्येयो गणनातीतं विदुः कालमतः परम् ॥ १३६
यथासंभवमेतेषु मनूनामायुरूह्यताम्[5] । संख्याज्ञानमिदं विद्वान् सुधीः पौराणिको भवेत् ॥ १३७
अल्पे शिष्टे तृतीयान्ते क्षीणे वृक्षगुणे क्रमात् । लोभादिषु प्रवृद्धेषु कर्मभूमिश्च जायते ॥ १३८
असिर्मसिः कृषिर्विद्या वाणिज्यव्यवहारता । इति प्रोक्तानि कर्माणि शिल्पानि च महात्मना ॥ १३९
अहिंसादिगुणैर्युक्तस्त्यागेन्द्रियजयात्मकः । दर्शनज्ञानवृत्तात्मा ततो धर्मो हि देशितः ॥१४०
पुरग्रामनिवेशाश्च आकरः पत्तनानि च । अध्यक्षव्यवहाराश्च आदिराजकृता भुवि ॥ १४१
जिनाश्चक्रधरा भूपा हलिनः केशवा अपि । कर्मभूमिषु जायन्ते नाभूवन् ये युगत्रये ॥ १४२

यहां उन संख्याभेदोंके इन नामोंका यथाक्रमसे निर्देश किया जाता है जिस प्रकारसे कि वे प्रवाहस्वरूपसे अनादि आगमके पदोंमें प्रसिद्ध हैं ॥१३०॥ पूर्वांग, पूर्व, पर्वांग, पर्व, नयुतांग, नयुत, कुमुदांग, कुमुद, पद्मांग, पद्म, नलिनांग, नलिन, कमलांग, कमल, तूटयंग, तुटित, अटटांग, अटट, अममांग, अमम, हाहांग, हाहा, हूहू-अंग, हूहू, लतांग, लता, महालतांग, महालता, शिरःप्रकम्पित, हस्तप्रहेलित और अचलात्मक; इस प्रकारकी पर्यायोंस्वरूप वह काल संख्येय कहा जाता है । इससे आगेके गणना रहित उस कालको असंख्येय काल जानना चाहिए ॥१३१-१३६॥ उपर्युक्त कुलकरोंकी आयु यथासम्भव इन्हीं भेदोंमें जानना चाहिये । इस संख्याज्ञानका जानकार पुराणका वेत्ता (पण्डित) होता है ॥१३७॥

तृतीय कालके अन्तमें थोड़ा-सा ही काल शेष रह जानेपर क्रमशः कल्पवृक्षोंकी फलदान शक्तिके नष्ट हो जानेसे मनुष्योंमें लोभादिकी वृद्धि होती है और इस प्रकारसे कर्मभूमिका प्रारम्भ होता है ॥१३८॥ असि (शस्त्रधारण), मसि (लेखन कार्य), कृषि (खेती), विद्या (संगीत, नृत्य एवं अध्यापन आदि), वाणिज्यव्यवहार (क्रय-विक्रय आदि) तथा शिल्प (कारीगरी), ये कर्मभूमिमें महात्मा नाभिरायके द्वारा आजीविकाके योग्य छह कर्म कहे गए थे ॥ १३९ ॥ उस समय अहिंसा आदि गुणोंसे संयुक्त, त्याग व इन्द्रियनिग्रहके आश्रित; सम्यग्दर्शन, सम्यग्ज्ञान एवं सम्यक्चारित्रस्वरूप धर्म बतलाया गया था ॥१४०॥

कर्मभूमिका प्रारंभ होनेपर इस पृथिवीपर भगवान् आदिनाथने ग्रामाध्यक्ष आदिके व्यवहारके साथ ही पुरों, ग्रामों, आवासों आकरें एवं पत्तनोंकी भी रचना की थी ॥१४१॥ तीर्थंकर, चक्रवर्ती, बलदेव, नारायण और प्रतिनारायण; ये तिरेसठ शलाकपुरुष कर्मभूमियोंमें उत्पन्न

१ ब नवुतांगं । २ ब °न्नवुतं । ३ प °ह्वयमतः । ४ प प्राकारः । ५ प °रुह्यताम् ।

पूर्वकोटिः प्रकृष्टायुः प्रत्यहं चापि भोजनम् । धनुष्पञ्चशतोच्छ्रायश्चतुर्थ्यादौ नृणां भवेत् ॥१४३
। ७०५६,०७ ।

पञ्चवर्णशरीराश्च धर्माधर्मरताः प्रजा । कुपाखण्डा[1] न विद्यन्ते तस्मिन् काले समागते ॥ १४४
पञ्चस्वपि विदेहेषु चतुर्थ्यादियुगं स्थितम् । गुणेषु हीयमानेषु[2] पञ्चमी चोपतिष्ठते ॥ १४५
तत्रादौ सप्तहस्तोच्चा[3] विंशत्यब्दशतायुषः । [4]रूक्षवर्णशरीराश्च प्रायाहाराश्च मानवाः ॥ १४६
स्तब्धा लुब्धाः कृतघ्नाश्च पापिष्ठाः प्रायशः शठाः । रूक्षाः क्रूरा जडा मूर्खा अमर्यादा अधार्मिकाः ॥
हिंसाचौर्यानृतोद्युक्ताः कातराः परदूषकाः । पिशुनाः क्रोधना धूर्ताः पञ्चमे प्रायशो नराः ॥ १४८
डामरक्षामरोगार्ता बाधाभग्नाश्च मानवाः । न त्रातारं न भर्तारं लभन्ते कालकर्षिताः[5] ॥ १४९
ईतिचोरठकाद्याढ्या त्वनावृष्टिविरूक्षिता । व्याधापहृतभार्या च तथा भूमिर्न शोभते ॥ १५०
व्यालकीटमृगव्याधैरन्यायायुक्तिकेश्वरैः । कुहकैश्च वृथा लोको यथेष्टमभिपीडयते ॥ १५१

होते हैं; सुषमसुषमा आदि पूर्वके तीन कालोंमें वे नहीं उत्पन्न होते ॥१४२॥ चतुर्थ कालके प्रारम्भमें मनुष्योंकी उत्कृष्ट आयु एक पूर्वकोटि (७०५६शून्य१७) प्रमाण, प्रतिदिन आहारग्रहण और शरीरकी ऊंचाई पांच सौ धनुष प्रमाण होती है ॥१४३॥ उस काल (चतुर्थ) के शरीरोंका वर्ण (द्रव्य लेश्या) पांच प्रकारका होता है। तथा प्रजाजन धर्म एवं अधर्म दोनोंमें उपस्थित होनेपर ही निरत होते हैं, अर्थात् उनमें बहुत-से धर्मात्मा भी होते हैं और बहुत-से पापिष्ठ भी होते हैं। उस समय निकृष्ट पाखण्डी नहीं रहते हैं ॥१४४॥

पांचों ही विदेहोंमें चतुर्थ कालके प्रारम्भ जैसा युग स्थित रहता है। [पांच भरत एवं ऐरावत क्षेत्रोंमें] क्रमशः बुद्धि व आयु आदि गुणोंके हीयमान होनेपर चतुर्थ कालके बाद पंचम काल उपस्थित होता है ॥१४५॥ उसके प्रारम्भमें शरीरकी ऊंचाई सात हाथ और आयु एक सौ बीस वर्ष प्रमाण होती है। इस कालमें उत्पन्न हुए मनुष्य रूखे वर्णयुक्त शरीरसे संयुक्त होते हुए प्रचुरतासे भोजन करनेवाले होते हैं ॥ १४६ ॥ पंचम कालमें उत्पन्न हुए मनुष्य प्रायः करके कुण्ठित, लोभी, कृतघ्न, पापिष्ठ, प्रायः करके दुष्ट, रूखे, क्रूर, जड, मूर्ख, मर्यादासे रहित, अधार्मिक, हिंसा, चोरी एवं असत्यमें उद्युक्त (प्रवर्तमान), कातर, परनिन्दक, पिशुन, क्रोधी और धूर्त होते हैं ॥१४७-१४८॥ इस कालके मनुष्य विप्लव (उपद्रव) को सहनेवाले, कृश, रोगोंसे पीड़ित और बाधाओंसे भग्न होते हैं। कालके प्रभावसे वे उस समय किसी रक्षक और भरण-पोषण करनेवालेको नहीं पाते हैं ॥१४९॥ इस कालमें ईति, चोर एवं ठग आदिसे सहित तथा वर्षासे रहित रूखी पृथिवी शोभायमान नहीं होती है। उस समय इस पृथिवीके ऊपर व्याधोंके द्वारा स्त्रियोंका अपहरण किया जाता है ॥ १५० ॥ इस कालमें व्याल (सर्प) कीड़े मृगादि पशु, व्याध (शिकारी), अन्याय व अयोग्य आचरण करनेवाले तथा कपटी लोगोंके द्वारा प्रजाजनोंको मनमाना कष्ट पहुंचाया जाता है ॥ १५१ ॥

---

१ ब कुपाषंडा। २ ब हिय°। ३ प हस्तोच्च। ४ प रक्ष°। ५ ब कर्शिताः।

हस्तद्वयसमुच्छ्राया धूमश्यामा विरूपकाः । वर्षाद्वौ पञ्चमान्ते च विंशत्यब्दायुषोऽधिकात् ॥ १५२
तत्र सूर्योदये धर्मो मध्याह्ने राजशासनम् । अस्तं गच्छति सूर्येऽग्निर्नश्यत्येकदिने क्रमात् ॥ १५३
धर्मे लोकगुरौ नष्टे पितरीव नृपेऽपि च । आधारे च महत्यग्नौ अनाथं जायते जगत् ॥ १५४
कालदोषविनष्टानामज्ञानां नीचकर्मणाम् । [1]त्यक्तानामपि धर्मेण मृगाचारः प्रवर्तते ॥ १५५
ततः कालानुभावेन प्रजानामपि पीडया । घोरः संवर्तको नाम्ना प्रादुर्भवति मारुतः ॥ १५६
चूर्णयित्वाद्रिवृक्षांश्च भित्त्वा भूमितलानि सः । विशो भ्राम्यति भूतानां पीडां घोरामुदीरयन् ॥ १५७
वृक्षभङ्गशिलाभेदैर्भ्रमद्भिर्वातधूर्णितैः । म्रियन्ते परितो[2] जीवा मूर्च्छन्ति विलपन्ति च ॥ १५८
विजयार्धान्तमासन्ना भीता उत्पातदर्शनात् । भग्नशेषा नरास्तत्र गङ्गासिन्धुमुखान्तिकाः ॥ १५९
प्रविशन्ति बिलं कृच्छ्रान्नद्योस्तीरं समाश्रिताः । द्विसप्ततिनिगोदास्तु तत्र जीवन्ति बीजवत् ॥ १६०

उक्तं च द्वयं [3]त्रिलोकप्रज्ञप्तौ [४,१५४७-४८]—

गंगासिंधुणदीणं वेयड्ढवणंतरम्मि पविसंति । पुह पुह संखेज्जाइं बावत्तरि[4] सयलजुगलाइं ॥ १४
देवा विज्जाहरया कारुण्णपरा णराण तिरियाणं । संखेज्जजीवरासिं खिवंति तेसुं पएसेसुं ॥ १५

पंचम कालके अंतमें तथा छठे कालके आदिमें आयु बीस वर्षसे अधिक तथा मनुष्योंके शरीर दो हाथ ऊंचे एवं धूमके समान श्यामवर्ण होकर कुरूप होते हैं ॥ १५२ ॥ पंचम कालके अन्तमें एक ही दिनमें क्रमसे सूर्योदयके समय (प्रातःकाल) में धर्म, मध्यान्ह कालमें राजशासन तथा सूर्यके अस्त होते समय अग्निका नाश होता है ॥१५३॥ लोकके गुरुस्वरूप धर्मके, पिताके समान प्रजाकी रक्षा करनेवाले राजाके, तथा महान् आधारभूत अग्निके विनष्ट हो जानेपर जगत् अनाथ हो जाता है ॥१५४॥ तब कालदोषसे विनाशको प्राप्त होकर नीच कर्म करनेवाले अज्ञानियोंमें धर्मको छोड़कर पशुवत् आचरण प्रवृत्त होता है ॥१५५॥ तत्पश्चात् कालके प्रभावसे और प्रजाजनोंकी पीड़ासे भयानक संवर्तक नामक वायुका प्रादुर्भाव होता है । ॥१५६॥ वह पर्वतों और वृक्षोंको चूर्णित करके तथा पृथिवीतलोंको भेदकर प्राणियोंके लिये भयंकर पीड़ा उत्पन्न करता हुआ दिशाओंमें घूमता है ॥१५७॥ वायुसे प्रेरित होकर घूमते हुए वृक्षखण्डों और शिलाभेदोंके द्वारा सब ओर प्राणी विलाप करते हुए मूर्च्छाको प्राप्त होते और मरते हैं ॥१५८॥ इस उपद्रवको देखकर भयको प्राप्त हुए प्राणी विजयार्धके निकट पहुंचते हैं । उनमें मरनेसे बचे हुए गंगा-सिंधु नदियोंके पासमें स्थित वे प्राणी बड़े कष्टसे उन नदियोंके किनारे जाकर बिलोंमें प्रविष्ट होते हैं । उनमें बहत्तर युगल बीजके समान जीवित रहते हैं ॥१५९-१६०॥ त्रिलोकप्रज्ञप्तिमें कहा भी है —

इस समय पृथक् पृथक् संख्यात जीव तथा युगलके रूपमें सम्पूर्ण बहत्तर जीवयुगल गंगा-सिन्धु नदियों तथा विजयार्ध पर्वतोंके वनोंके मध्यमें प्रविष्ट होते हैं ॥ १४ ॥ कुछ दयालु देव एवं विद्याधर उक्त मनुष्यों और तिर्यंचोंमेंसे संख्यात जीवराशिको पूर्वोक्त प्रदेशोंमें स्थापित करते हैं ॥ १५ ॥

१ प त्यक्त्वा° । २ प परतो । ३ आ प उक्तं च त्रि° । ४ आ प भावत्तरि ।

शीतक्षारविषश्च्योताः[1] परुषाग्निक्षरा[2] अपि । धूलीधूमक्षराश्चैव प्रवर्षन्ति क्रमाद्घनाः ॥ १६१
एकैको दिवसान् सप्त आप्लावयति तोयदः । तैः शेषाश्च प्रजा[3] नाशमुपयान्ति स्वपापतः ॥ १६२
विषदग्धाग्निनिर्दग्धा भूः सस्थावरजङ्गमाः । अधो योजनमध्वानं चूर्णीभवति कालतः ॥ १६३
काले दीर्घायुषश्चात्र त्रिंशद्वर्षसमायुषः । मत्स्यमण्डूकमूलाद्यैराहारैर्वर्तयन्ति च ॥ १६४
समा उक्ता षडप्येता भरतैरावतेषु तु । क्रमेण परिवर्तन्ते उत्सर्पिण्या विपर्ययात् ॥ १६५
षष्ठाद्येनावसर्पिण्यामुत्सर्पिण्याद्यषष्ठका[4] । उभौ समाविति ज्ञेयावन्यासां चैवमादिशेत् ॥ १६६
पुष्कराख्या पुनर्मेघाः प्रादुर्भूय समन्ततः । वर्षन्त्यौष्ण्यप्रशान्त्यर्थं[5] सप्ताहं सार्वलौकिकाः ॥ १६७
दुग्धमेघाश्च वर्षन्ति भूम्याः[6] शुभ्रकरास्ततः । स्नेहदा घृतमेघाश्च स्निग्धां कुर्वन्ति मेदिनीम् ॥
अमृतोदकमेघाश्च ओषधीं जनयन्ति ते । रसमेघाः पुनस्तासु नानारसकराः स्मृताः ॥ १६९
नानारसजलैर्भूमिर्मृष्टास्वादा प्रवर्तते[7] । वल्लीगुल्मलता वृक्षा नानाकारा भवन्ति च ॥ १७०

उस समय क्रमसे शीत (बर्फ), क्षार, विष, परुष (पाषाणादि), अग्नि, धूलि और धूमकी वर्षा करनेवाले मेघ बरसते हैं ॥ १६१ ॥ इनमेंसे एक एक मेघ क्रमसे सात सात दिन पर्यन्त उपर्युक्त हिम आदिकी वर्षा करता है। जो जीव देवों व विद्याधरोंके द्वारा सुरक्षित स्थानमें पहुंचाये जाते हैं उनको छोड़कर शेष जीव उक्त मेघोंके द्वारा अपने पापके उदयसे नाशको प्राप्त होते हैं ॥ १६२ ॥ कालके प्रभावसे विष एवं अग्निकी वर्षासे निःशेष जली हुई भूमि स्थावर व जंगम (त्रस) जीवोंके साथ नीचे एक योजन पर्यन्त चूर चूर हो जाती है ॥ १६३ ॥ उस कालमें यहां तीसके आधे अर्थात् पन्द्रह वर्ष प्रमाण उत्कृष्ट आयुवाले प्राणी मत्स्य, मेंढक और मूल आदिके आहारसे जीवित रहते हैं ॥ १६४ ॥ ऊपर जो ये छहों काल बतलाये गये हैं वे यहां भरत और ऐरावत क्षेत्रोंमें अवसर्पिणी कालमें इसी क्रमसे तथा उत्सर्पिणी कालमें विपरीत (अतिदुःषमा व दुःषमा आदि) क्रमसे प्रवर्तमान होते हैं ॥ १६५ । अवसर्पिणी कालमें जो छठा (अतिदुःषमा) काल अन्तमें कहा गया है वही छठा काल उत्सर्पिणीका प्रथम काल होता है। इस प्रकार इन दोनों कालोंकी गति समझना चाहिये । शेष कालोंका भी निर्देश इसी प्रकारसे करना चाहिये ॥ १६६ ॥

उत्सर्पिणी कालके प्रारम्भमें समस्त लोकका भला करनेवाले पुष्कर नामक मेघ प्रगट होकर पूर्वोत्पन्न उष्णताको शान्त करनेके लिये सात दिन पर्यन्त बरसते हैं ॥१६७ ॥ तत्पश्चात् भूमिको सफेद करनेवाले क्षीरमेघ बरसते हैं, अनन्तर चिक्कणताको देनेवाले घृतमेघ भी पृथिवीको स्निग्ध कर देते हैं ॥ १६८ ॥ फिर वे प्रसिद्ध अमृतमेघ भी अमृतके समान जलकी वर्षा करके औषधियोंको उत्पन्न करते हैं, तत्पश्चात् रसमेघ उन औषधियोंमें अनेक प्रकारके रसको उत्पन्न करते हुए स्मरण किये गये हैं ॥ १६९ ॥ उस समय नाना रसोंसे संयुक्त जलके द्वारा भूमि मृष्ट (मधुर) स्वादवाली हो जाती है और तब अनेक आकारवाली बेलें, झाड़ियाँ,

---

१ आ विषश्च्योताः ब विषश्चोताः । २ ब पुरुषाग्नि° । ३ प प्रजाः । ४ ब सर्पिण्या उत्स° । ५ आ वर्षन्त्यौष्णप्र°,पवर्षन्त्यौष्ठाप्र° । ६ प भूम्या । ७ आ प प्रवर्षते ।

गुहानद्याश्रिता मर्त्याः शैत्यगन्धगुणाहृताः । विनिर्गत्य ततः सर्वे मेदिनीमावसन्ति च ॥ १७१
भूमिमूलफलाहारा वर्धमानफलोदयाः । बहुला लघु जायन्ते धान्यानि च ततः परम् ॥ १७२
समासहस्रशेषे च दुःषमाया विवर्धने । भवन्ति कुलकृन्मर्त्यास्ततः पञ्चदश क्रमात् ॥ १७३

उक्तं च त्रिलोकसारे [८७१-७२]—

उस्सप्पिणीय विदिये सहस्स सेसेसु कुलयरा कणय । कणयप्पहरायद्धयपुंगव तह नलिणपउममहपउमा ॥
तस्सोसलमणुहि [1]कुलायाराणलपक्कपहुदिया होंति । तेवट्ठिणरा तदिये सेणियचरपढमतित्थयरो ॥
ततः प्रभृति सर्वज्ञा बलकेशवचक्रिणः । प्रतिशत्रुनृपाश्चैव भवन्ति क्रमशो भुवि ॥ १७४
अनीतिः स्थितमर्यादो गुणवन्नरमण्डितः । सुभिक्षो धर्मकर्माढ्यस्तृतीयोऽप्यतिवर्तते ॥ १७५
ततस्तुर्या भवेत्तत्र सुषमा पञ्चमी समा[2] । द्विरुक्तसुषमा षष्ठी युत्सर्पिण्यामिति स्मृताः ॥ १७६

इति लोकविभागे कालविभागो नाम पञ्चमप्रकरणं समाप्तम् ।

लतायें एवं वृक्ष उत्पन्न होने लगते हैं ॥ १७० ॥ जो मनुष्य पहिले गुफाओं और नदियोंके आश्रित हुए थे वे सब अब शीतल गन्ध गुणको ग्रहण करते हुए वहाँसे निकलकर पृथिवीपर आ वसते हैं ॥ १७१ ॥ उस समय भूमि बढ़नेवाली फलोंकी उत्पत्तिसे संयुक्त हो जाती है। मनुष्य और तिर्यंच भूमि (मिट्टी), मूल और फलोंका आहार किया करते हैं। तत्पश्चात् पृथिवीके ऊपर धान्य (गेहूं व चना आदि) शीघ्र ही उत्पन्न होने लगता है ॥ १७२ ॥ उत्सर्पिणी कालमें दुःषमाके एक हजार वर्ष शेष रह जानेपर क्रमसे पन्द्रह कुलकर पुरुष उत्पन्न होते हैं ॥ १७३ ॥ त्रिलोकसारमें कहा भी है —

उत्सर्पिणीके द्वितीय (दुःषमा) कालमें एक हजार वर्ष शेष रह जानेपर ये कुलकर उत्पन्न होते हैं — कनक, कनकप्रभ, कनकराय, कनकध्वज, कनकपुंगव; इसी प्रकारसे नलिन, नलिनप्रभ, नलिनराय, नलिनध्वज, नलिनपुंगव, पद्म, पद्मप्रभ, पद्मराय, पद्मध्वज, पद्मपुंगव और महापद्म ॥ १६ ॥ उन सोलह कुलकरोंके द्वारा कुलाचार और अग्निसे भोजन पकाने आदिका प्रारम्भ होने लगता है। इसी उत्सर्पिणीके तृतीय कालमें तिरेसठ (६३) शलाकपुरुष उत्पन्न होते हैं। इनमें प्रथम तीर्थंकर भूतपूर्व श्रेणिक राजाका जीव होगा ॥ १७ ॥

उन कुलकरोंको आदि लेकर इस पृथिवीपर क्रमसे सर्वज्ञ, बलदेव, नारायण, प्रतिनारायण और चक्रवर्ती भी होते हैं ॥ १७४ ॥ इस प्रकार ईतिसे रहित, मर्यादासे सहित, गुणवान् पुरुषोंसे मण्डित और धर्म-कर्मसे संयुक्त यह तीसरा सुकाल भी बीत जाता है ॥ १७५ ॥ तत्पश्चात् चौथा (सुषमादुःषमा), पांचवां सुषमा और छठा दो बार कहा गया सुषमा अर्थात् सुषमासुषमा ये तीन काल क्रमसे प्रवर्तमान होते हैं । इस प्रकार उत्सर्पिणीमें कालोंकी प्रवृत्ति मानी गई है ॥ १७६ ॥

इस प्रकार लोकविभागमें कालविभाग नामक पांचवां प्रकरण समाप्त हुआ ॥५ ॥

---

१ ब मणुपि कुलो । २ आ प सदा । अतोऽग्रे आ प 'जिनैर्ज्योतिषिकाः प्रोक्ता बे चरंतः स्थिता अपि' इत्यर्धश्लोकोऽधिको लभ्यते ।

[षष्ठो विभागः]

ज्ञानसुज्योतिषा लोको येनाशेषः प्रकाशितः । तं सर्वज्ञं प्रणम्याग्रे ज्योतिर्लोकः प्रवक्ष्यते ॥ १

चन्द्राः सूर्या ग्रहा भानि तारकाश्चेति पञ्चधा । जिनैर्ज्योतिषिकाः प्रोक्ताः खे चरन्तः स्थिता अपि ॥

गोलकार्धगृहास्तेषां ज्योतिषां मणितोरणाः । भ्राजन्ते देवदेवीभिर्जिनबिम्बैश्च नित्यशः ॥ ३

ऊर्ध्वमष्टशते भूम्या दशोनेऽन्त्यास्तु तारकाः । ताभ्यो दशसु सूर्याः स्युस्ततोऽशीत्यां निशाकराः ॥

७९० । ८०० । ८८० ।

तेभ्यश्चतुर्षु ऋक्षाणि तेभ्यः सौम्याश्च सावति । शुक्रगुर्वारसौराश्च त्रिषु त्रिषु यथाक्रमम् ॥ ५

४ । ४ । ३ । ३ । ३ । ३ ।

ज्योतिःपटलबाहल्यं दशाग्रं शतयोजनम् । भ्रमन्ति मानुषावासे स्थित्वा भान्ति[1] ततः परम् ॥ ६

। ११० ।

गव्यूतिसप्तभागेषु जघन्यं तारकान्तरम् । पञ्चाशन्मध्यमं ज्ञेयं सहस्रं बृहदन्तरम् ॥ ७

। $\frac{1}{7}$ । ५० । १००० ।

जिसने ज्ञानरूपी उत्तम ज्योतिके द्वारा समस्त लोकको प्रकाशित किया है उस सर्वज्ञ देवको प्रणाम करके आगे ज्योतिर्लोकका वर्णन किया जाता है ॥ १ ॥ चन्द्र, सूर्य, ग्रह, नक्षत्र और तारा इस प्रकारसे जिनेन्द्र देवके द्वारा ज्योतिष देव पांच प्रकारके कहे गये हैं। इनमें कुछ आकाशमें परिभ्रमण किया करते हैं और कुछ वहां स्थित भी रहते हैं ॥ २ ॥ उन ज्योतिषी देवोंके अर्ध गोलकके समान गृह मणिमय तोरणोंसे अलंकृत होते हुए निरन्तर देव-देवियों और जिनबिम्बोंसे सुशोभित रहते हैं ॥ ३ ॥ इस पृथिवीसे दस कम आठ सौ (७९०) योजन ऊपर जाकर अन्तिम तारा स्थित हैं, उनसे दस (७९० + १० = ८००) योजन ऊपर जाकर सूर्य, उनसे अस्सी (८०० + ८० = ८८०) योजन ऊपर जाकर चन्द्र, उनसे चार (४) योजन ऊपर जाकर ग्रह, उनसे उतने (४) ही योजन ऊपर जाकर बुध, फिर क्रमसे तीन-तीन योजन ऊपर जाकर शुक्र, गुरु, मंगल और शनि स्थित हैं ॥४-५॥ ज्योतिषपटलका बाहल्य एक सौ दस (१० + ८० + ४ + ४ + ३ + ३ + ३ + ३ = ११०) योजन मात्र है, अर्थात् उपर्युक्त सब ज्योतिषी देव क्रमशः पृथिवीसे ऊपर सात सौ नब्बेसे लेकर नौ सौ योजन तक एक सौ दस योजनके भीतर अवस्थित हैं। जो ज्योतिषी देव मनुष्यलोक (अढ़ाई द्वीप) में वर्तमान हैं वे परिभ्रमण किया करते हैं, और इससे आगेके सब ज्योतिषी देव अवस्थित (स्थिर) रहकर सुशोभित होते हैं ॥ ६ ॥

एक तारासे दूसरे तारे तक ताराओंका जघन्य अन्तर एक कोसके सातवें भाग ($\frac{1}{7}$) मात्र, मध्यम अन्तर पचास ५० [योजन] और उत्कृष्ट अन्तर एक हजार १००० [योजन] मात्र जानना चाहिये ॥ ७ ॥

---

१ प भ्रान्ति ।

पृथिवीपरिणामश्च तेजोधातुश्च भास्करः । उदितं चातपं नाम नामकर्मात्र भास्करे ॥ ८
एकषष्ठिकृतान् भागान् योजनस्य पृथू रविः । चत्वारिंशतमष्टौ च परिधिस्त्रिगुणोऽधिकः ॥ ९
$\frac{४८}{६१}$ । $\frac{१४४}{६१}$ ।
द्वादशैव सहस्राणि तस्योष्णाश्च गभस्तयः । तावन्त एव चन्द्रस्य शीतलाः किरणा मताः ॥१०
अरिष्टश्चार्कवद्वेद्यो व्यासेन न्यूनयोजनम् । राहुः समानोऽरिष्टेन शीतलांशुश्च भाषितः ॥ ११
एकषष्टघास्तु भागेषु पञ्चहीनास्तु पार्थवे । अब्दा तु शीतलांशौ च सोमेनेन्यूनचक्रवत् ॥ १२
। $\frac{५६}{६१}$ । ।
शुक्रश्च [1]पृथिवीधातुर्गोरुतं बहलः[2] पृथुः । द्वे सहस्रे पुनः सार्धे रश्मयो रविवद्द्युतिः[3] ॥ १३
बुधस्य खलु भौमस्य शनैश्चारिण एव च । क्रोशार्धं विस्तृतं पीठं गुरोरूनं तु गोरुतम् ॥ १४
चतुर्भागं द्विभागं च चतुर्भागोनगोरुतम् । गोरुतं चापरास्तारा विस्तृता मन्दरश्मयः ॥ १५
$\frac{१}{४}$ । $\frac{१}{२}$ । $\frac{३}{४}$ ।

पाठान्तरं कथ्यते —

पृथिवीके परिणाम स्वरूप सूर्यका बिम्ब चमकीली धातुसे निर्मित होता है। उस सूर्यके– उसके बिम्बमें स्थित पृथिवीकायिक जीवोंके– आतप नामकर्मका उदय हुआ करता है [उससे मूलमें अनुष्ण रहकर भी उसकी प्रभा उष्ण होती है] ॥ ८ ॥ सूर्यबिम्बका विस्तार एक योजनके इकसठ भागोंमें चालीस और आठ अर्थात् अड़तालीस भाग ($\frac{४८}{६१}$) प्रमाण है। उसकी परिधि विस्तारसे कुछ अधिक तिगुनी ($\frac{१४४}{६१}$) है ॥ ९ ॥ सूर्यकी उष्ण किरणें बारह हजार (१२०००) प्रमाण हैं। उतनी (१२०००) ही शीतल किरणें चन्द्रमाकी मानी गई हैं ॥ १० ॥

केतुका भी विमान सूर्यके ही समान जानना चाहिये, उसका विस्तार एक योजनसे कुछ कम है। राहुका विमान केतुके समान होता हुआ शीतल किरणोंसे संयुक्त कहा गया है ॥ ११ ॥ चन्द्रबिम्बका भी विस्तार एक योजनके इकसठ भागोंमें पांच कम अर्थात् छप्पन ($\frac{५६}{६१}$ भाग प्रमाण है। ..... (?) ॥ १२ ॥

पृथिवीधातुमय शुक्र विमानका विस्तार एक कोस मात्र तथा किरणें अढ़ाई हजार (२५००) हैं, कान्ति उसकी सूर्यके समान है ॥ १३ ॥ बुध, मंगल और शनैश्चरकी पीठका विस्तार आधा कोश तथा गुरुकी पीठका विस्तार कुछ कम एक कोस प्रमाण है ॥ १४ ॥ मन्द किरणोंसे संयुक्त अन्य ताराओंका विस्तार एक कोसके चतुर्थ भाग ($\frac{१}{४}$), एक कोसके द्वितीय भाग ($\frac{१}{२}$), चतुर्थ भागसे कम एक कोस ($\frac{३}{४}$), तथा पूर्ण कोस प्रमाण है। [अभिप्राय यह कि ताराओंका जघन्य विस्तार एक कोसके चतुर्थ भाग प्रमाण तथा उत्कृष्ट पूरे कोस प्रमाण है, उनका मध्यम विस्तार एक कोसके चतुर्थ भागसे कुछ अधिकको आदि लेकर कुछ कम एक कोस प्रमाण अनेक भेद रूप है] ॥ १५ ॥ पाठान्तर कहा जाता है —

---

१ आ प पृथुवी° । २ आ प बहुलः । ३ आ प द्युति ।

रवीन्दुशुक्रगुर्वाख्याः कुजाः सौम्यास्तमोदयाः । ऋक्षास्तारास्त्वविष्कम्भादर्धबाहुल्यका मताः ॥ १६
सिंहाकारा हि तौ प्राच्यां त्वपाच्यां गजरूपकाः । प्रतीच्यां वृषभाकारा उदीच्यां जटिलाश्वकाः ॥
वहन्ति चाभियोगास्ते षोडशैव सहस्रकम् । रवीन्दुभ्यां त्रयः शेषा ह्रीयन्तेऽर्धार्धसंख्यया ॥ १८
चं १६००० सू १६००० । ८००० । न ४००० । ता २०००।
आचार्यकृतविन्याससमुदो[1] वाप्यधोमुखः । ज्योतिर्लोकस्वभावोऽयमालोकान्तादिति स्थितः ॥ १९
उत्तरोऽभिजिदृक्षाणां मूलो दक्षिण इष्यते । ऊर्ध्वाधः स्वाति भरणी क्रमान्मध्ये च कृत्तिका ॥ २०
सर्वमन्दः शशी गत्या रविः शीघ्रतरस्ततः । रवेर्ग्रहास्ततो भानिस्तेभ्यस्ताराश्च शीघ्रकाः ॥ २१
चरतीन्दोरधो राहुररिष्टोऽपि च भास्वतः । षण्मासात् पर्वसंप्राप्तावर्केन्दू वृणुतश्च तौ ॥ २२
त्यक्त्वा मेरुं चरन्त्येकद्व्येकैकं ज्योतिषां गणाः । विहायेन्दुत्रयं शेषाश्चरन्त्येकपथे सदा ॥ २३
। ११२१ ।
शशिनौ द्वाविह द्वीपे चत्वारो लवणोदके । परस्मिन् द्वादशैव स्युः कालोदे सप्त षड्गुणाः ॥ २४
पुष्करार्धे पुनश्चन्द्रा द्विसप्ततिरितीरिताः । चन्द्राणां मानुषक्षेत्रे द्वात्रिंशच्छतमुच्यते ॥ २५

सूर्य, चन्द्र, शुक्र, गुरु, कुज (मंगल), बुध, और राहु ये ग्रह; नक्षत्र तथा तारे इन सबका बाहल्य अपने विस्तारसे आधा माना गया है ॥ १६ ॥

उन सूर्य और चन्द्रके विमानोंको पूर्वमें सिंहके आकार, दक्षिणमें हाथीके आकार, पश्चिममें बैलके आकार, तथा उत्तरमें जटायुक्त घोड़ेके आकारके सोलह हजार (१६०००) अभियोग्य जातिके देव खींचते हैं। सूर्य और चन्द्रके अतिरिक्त शेष तीन (ग्रह, नक्षत्र, और तारा) के विमानवाहक देवोंकी संख्या क्रमसे आधी आधी है। (चन्द्र १६०००, सूर्य १६००० ग्रह ८०००, नक्षत्र ४००० तारा २०००) ॥ १७–१८ ॥ .....(?) यह ज्योतिर्लोकका स्वभाव लोक पर्यन्त स्थित है ॥ १९ ॥

नक्षत्रोंमेंसे उत्तरमें अभिजित् नक्षत्रका, दक्षिणमें मूल नक्षत्रका, ऊपर और नीचे क्रमशः स्वाति और भरणी नक्षत्रोंका तथा मध्यमें कृत्तिका नक्षत्रका संचार माना गया है ॥ २० ॥ गमनमें चन्द्रमा सबसे मन्द है, सूर्य उसकी अपेक्षा शीघ्र गमन करनेवाला है, सूर्यसे शीघ्रतर गतिवाले ग्रह, उनसे नक्षत्र, तथा उनसे भी शीघ्रतर गतिवाले तारा हैं ॥ २१ ॥ चन्द्रके नीचे राहुका विमान तथा सूर्यके भी नीचे केतुका विमान संचार करता है। वे दोनों छह मासमें पर्व (क्रमसे पूर्णिमा व अमावस्या) की प्राप्ति होनेपर चन्द्र और सूर्यको आच्छादित करते हैं ॥२२॥ ज्योतिषियोंके समूह अंकक्रमसे एक, दो, एक और एक (११२१) अर्थात् ग्यारह सौ इक्कीस योजन प्रमाण मेरु पर्वतको छोड़कर संचार करते हैं। सूर्य, चन्द्र और ग्रह इन तीनको छोड़कर शेष नक्षत्र व तारागण सदा एक ही मार्गमें संचार करते हैं ॥ २३ ॥

चन्द्रमा यहां जंबूद्वीपमें दो, लवणोदक समुद्रमें चार, आगे धातकीखण्ड द्वीपमें बारह, कालोदक समुद्रमें छहसे गुणित सात अर्थात् ब्यालीस तथा पुष्करार्धमें बहत्तर कहे गये हैं। इस प्रकार मनुष्यक्षेत्र (अढ़ाई द्वीप) में समस्त चन्द्रोंकी संख्या एक सौ बत्तीस (२+४+१२+

१ ब समुद्गो ।

उद्दिष्टास्त्रिगुणाश्चन्द्रा धातक्यादिषु ते क्रमात्। अतिक्रान्तेन्दुभिर्युक्ता[1] द्वीपे वा सागरेऽपि वा ॥ २६
चत्वारिंशच्छतं चन्द्राश्चत्वारोऽपि च पुष्करे। द्विनवत्यधिकं प्राहुः पुष्करोदे चतुःशतम् ॥ २७
अष्टाशीतिग्रहा[2] इन्दोः साष्टा नानां च विंशतिः। एकैकस्य तु विज्ञेयं रवयः शशिभिः समाः॥२८
। २८ ।
समुद्रे त्रिशतं त्रिंशद् द्वीपे साशीतिकं शतम्। प्रविश्य चरतोऽर्केन्दू मण्डलानि च लक्षयेत् ॥ २९
३३० । १८० ।
वीथ्यः पञ्चदशेन्दोः स्युरेकोनान्यन्तराणि च। द्विशतं षोडशोनं तु रवे रूपोनमन्तरम् ॥ ३०
१५ । १४ ।
लवणे द्विगुणा वीथ्यो रवेश्चन्द्रस्य चोदिताः। पृथग्रूपोनका वीथ्यश्चान्तराणि च लक्षयेत् ॥ ३१
३० । ३६८ ।
नवतिः खलु चन्द्राणां वीथ्यः स्युर्धातकीध्वजे। एकादश शतानि स्युश्चतुरग्राणि भास्वताम् ॥ ३२
। ११०४ ।

+४२+७२=१३२) होती है ॥ २४-२५ ॥ धातकीखण्ड आदि विवक्षित द्वीप-समुद्रोंमें जितने चन्द्रोंका निर्देश किया गया है आगेके द्वीप अथवा समुद्रमें वे क्रमसे तिगुणे होकर पिछले द्वीप-समुद्रोंकी चन्द्रसंख्यासे अधिक हैं ॥ २६ ॥

उदाहरण- (१) धातकीखण्ड द्वीपमें १२ चन्द्र बतलाये गये हैं। इनको तिगुना करके प्राप्त संख्यामें पिछले द्वीप-समुद्रों (लवणोद ४+जं. द्वी. २=६) की चन्द्रसंख्याको जोड़ देनेसे आगेके कालोदक समुद्रमें स्थित चन्द्रोंकी संख्या प्राप्त हो जाती है। जैसे-१२×३+६=४२.

(२) कालोदक समुद्रमें ४२ चन्द्र स्थित हैं। इन्हें तिगुना करके प्राप्त राशिमें पिछली चन्द्रसंख्याको मिला दीजिये। इस प्रकारसे आगे पुष्करद्वीपकी चन्द्रसंख्या प्राप्त हो जायेगी। जैसे-४२×३+(१२+४+२)=१४४.

पुष्कर द्वीपमें एक सौ चालीस और चार अर्थात् एक सौ चवालीस (१४४) तथा पुष्करोद समुद्रमें चार सौ बानबे [१४४×३ + (४२+१२+४-२)=४९२] चन्द्र अवस्थित हैं ॥२७॥

एक एक चन्द्रके अठासी (८८) ग्रह तथा आठ सहित बीस अर्थात् अट्ठाईस (२८) नक्षत्र जानना चाहिये। सूर्य चन्द्रोंके ही समान होते हैं ॥ २८ ॥

सूर्य और चन्द्रमा समुद्र (लवणोद) में तीन सौ तीस (३३०) तथा द्वीप (जंबूद्वीप) के भीतर एक सौ अस्सी योजन प्रविष्ट होकर संचार करते हैं। उनकी वीथियां इस प्रकार जानना चाहिये ॥ २९ ॥ जंबूद्वीपमें चन्द्रकी पन्द्रह (१५) वीथियां और उनके अन्तर उनसे एक कम अर्थात् चौदह, (१४) हैं। सूर्यकी वीथियां सोलह कम दो सौ (१८४) और अन्तर एक कम अर्थात् एक सौ तेरासी (१८३) हैं ॥ ३० ॥ लवण समुद्रमें चन्द्र और सूर्यकी वीथियां पृथक् पृथक् इनसे दूनी (चन्द्रकी ३० और सूर्यकी ३६८) कही गई हैं। जितनी वीथियां हैं उनसे एक कम उनके अन्तर (२९, ३६७) भी जानना चाहिये ॥३१॥ धातकीखण्ड द्वीपमें चन्द्रोंकी वीथियां नब्बे (१५×६=९०) तथा सूर्योंकी वीथियां ग्यारह सौ चार (१८४×६=११०४) हैं ॥३२॥

---

१ आ °भिर्युक्ता, प °भियुक्त्वा। २ आ °गृंहा, प गृहा।

कालोदे चन्द्रवीथ्यः स्युस्त्रिशतं दश पञ्च च । अष्टात्रिंशच्छतानि स्युश्चतुःषष्टिश्च भास्वताम् ॥ ३३
चत्वारिंशत्सहस्रार्धमिन्दुवीथ्योऽर्धपुष्करे । षट्षष्टिस्तु शतानि स्युश्चतुर्विंशानि भास्वताम् ॥
। ५४० ।
मानुषोत्तरशैलाच्च[1] द्वीपसागरवेदिका – । मूलतो नियुतार्धेन ततो लक्षेण मण्डलम् ॥ ३५
५०००० ।
पुष्करार्धाद्यवलये[2] द्विगुणा च द्विसप्ततिः । चन्द्रसूर्यास्ततोऽन्येषु[3] चतुष्कं चोत्तरं पृथक् ॥ ३६
आदेराद्यस्तु विज्ञेयो द्विगुणद्विगुणक्रमः । परिधौ च स्वके स्व-स्वचन्द्रादित्यैर्हृतेऽन्तरे[4] ॥ ३७
गच्छोत्तरसमाभ्यासात्त्यजेदुत्तरमादियुक् । अन्त्यमादियुतं भूयो गच्छार्धगुणितं धनम् ॥ ३८
आ १४४ । उ ४ । ग ८ ।

कालोद समुद्रमें चन्द्रवीथियां तीन सौ दस और पांच अर्थात् तीन सौ पन्द्रह (१५×२१=३१५) तथा सूर्योंकी वीथियां अड़तीस सौ चौंसठ (१८४×२१=३८६४) हैं ॥ ३३ ॥ पुष्करार्ध द्वीपमें चन्द्रवीथियां हजारकी आधी और चालीस अर्थात् पांच सौ चालीस (१५×३६ =५४०) तथा सूर्योंकी वीथियां छयासठ सौ चौबीस (१८४×३६=६६२४) हैं ॥ ३४ ॥

मानुषोत्तर पर्वतके आगे द्वीप-समुद्रोंकी वेदिकाके मूल भागसे आधा लाख (५००००) योजन जाकर प्रथम मण्डल (सूर्य-चन्द्रोंका वलय) है, उसके आगे उनका प्रत्येक मण्डल एक एक लाख (१०००००) योजन जाकर है ॥ ३५ ॥ पुष्करार्ध द्वीपके प्रथम वलयमें दुगुणे बहत्तर (७२×२=१४४) अर्थात् एक सौ चवालीस सूर्य और चन्द्र स्थित हैं। इससे आगेके अन्य वलयोंमें वे पृथक् पृथक् चार चार चयसे अधिक (१४४, १४८, १५२, १५६, १६०, १६४, १६८, १७२) हैं ॥ ३६ ॥ आगेके द्वीप-समुद्रोंके प्रथम वलयमें पिछले द्वीप अथवा समुद्रके प्रथम वलयमें स्थित चन्द्रोंकी अपेक्षा क्रमसे दूने दूने चन्द्र जानना चाहिये। अपनी परिधिमें अपने अपने वलयगत चन्द्र और सूर्योंकी संख्याका भाग देनेपर वहां स्थित एक चन्द्रसे दूसरे चन्द्रका अन्तर जाना जाता है ॥ ३७ ॥

उदाहरण– द्वितीय पुष्करार्ध द्वीप सम्बन्धी प्रथम वलयकी सूचीका विस्तार ४६००००० योजन है, उसकी परिधि १४५४६४७७ यो. प्रमाण होती है। इस परिधिमें तद्गत सूर्य-चन्द्रोंकी संख्याका भाग देनेपर उन सूर्य और चन्द्रोंका बिम्ब सहित अन्तर इतना प्राप्त होता है — १४५४६४७७÷१४४ = १०१०१७ $\frac{२९}{६४}$ यो.। इसमेंसे चन्द्रबिम्ब और सूर्यबिम्बको कम कर देनेपर उनका बिम्बरहित अन्तर इस प्रकार प्राप्त हो जाता है— चन्द्रबिम्बका विस्तार $\frac{५६}{६१}$ = $\frac{८०६४}{८७८४}$; १०१०१७$\frac{२९}{६४}$ – $\frac{८०६४}{८७८४}$ = १०१०१६$\frac{२४८९}{८७८४}$ यो., चन्द्रबिम्बोंके मध्यका अन्तर। सूर्यबिम्बका विस्तार $\frac{४८}{६१}$ = $\frac{६९१२}{८७८४}$; १०१०१७$\frac{२९}{६४}$ – $\frac{६९१२}{८७८४}$ = १०१०१६$\frac{३६४१}{८७८४}$ यो., सूर्यबिम्बोंके मध्यका अन्तर।

गच्छ और चयको गुणित करनेसे जो प्राप्त हो उसमेंसे चयके प्रमाणको कम करके शेषमें आदिके प्रमाणको जोड़ देना चाहिये। इस प्रकारसे विवक्षित अन्तिम धन प्राप्त हो जाता

---

१ आ प शैलाच्च । २ आ प °वलये । ३ आ प °नेषु । ४ आ °दित्येहृतेंतरं प °दित्ये हृतेन्तरे ।

द्वादशैव शतानि स्युश्चतुःषष्ठ्याधिकानि हि । पुष्करार्धे बहिश्चन्द्रास्तावन्तोऽपि च भास्कराः ॥३९
तारकाकीर्णमाकाशमालोकान्तादितोऽमुतः । पुष्यस्थाः सर्वसूर्यास्तु चन्द्रास्त्वभिजिति स्थिताः ॥४०
चत्वारिंशच्च चत्वारि सहस्राणि शताष्टकम् । विंशतिश्चान्तरं मेरो रवेश्चासन्नमण्डले ॥ ४१
चत्वारिंशत्तथाष्टौ च एकषष्टिकृतांशकाः । द्वियोजने च प्रक्षेपस्तस्यानन्तरमण्डले ॥ ४२
स एव गुणितक्षेपः प्रक्षिप्तव्यो यथेप्सिते । आ बाह्यमण्डलादेवं मेरुसूर्यान्तरं भवेत् ॥ ४३
चत्वारिंशच्च पञ्चापि सहस्राण्यथ सप्ततिः । पञ्च चान्तरमाख्यातं मध्यमे मण्डले रवेः ॥ ४४
चत्वारिंशच्च पञ्चापि सहस्राणि शतत्रयम् । त्रिंशच्च मण्डले बाह्ये मेरुसूर्यान्तरं भवेत् ॥ ४५

है । इस अन्त्य धनमें फिरसे आदिको मिलाकर गच्छके अर्ध भागसे गुणित करनेपर सर्वधन प्राप्त होता है ॥ ३८ ॥

उदाहरण— प्रकृतमें आदिका प्रमाण १४४, चयका ४ और गच्छका प्रमाण ८ है । अत एव (८×४)-४+१४४ = १७२ अन्तिम धन; १७२+१४४×$\frac{८}{२}$ = १२६४ = (१४४+१४८ +१५२+१५६+१६०+१६४+१६८+१७२) सर्वधन ।

बाह्य पुष्करार्धमें बारह सौ चौंसठ (१२६४) चन्द्रऔर उतने ही सूर्य भी हैं ॥३९॥ यहां लोक पर्यन्त आकाश ताराओंसे व्याप्त है । सब सूर्य तो पुष्य नक्षत्रपर स्थित होते हैं, किन्तु चन्द्रमा अभिजित् नक्षत्रपर स्थित होते हैं ॥ ४० ॥

मेरुसे अभ्यन्तर मण्डल (वीथी) में स्थित सूर्यका अन्तर चवालीस हजार आठ सौ बीस (४४८२०) योजन प्रमाण रहता है ॥ ४१ ॥ इसमें दो योजन तथा एक योजनके इकसठ भागोंमेंसे चालीस और आठ अर्थात् अड़तालीस भाग (२$\frac{४८}{६१}$) प्रमाण [दिवसगतिका] प्रक्षेप करनेपर उतना अनन्तर (द्वितीय) मण्डलमें स्थित सूर्यका मेरुसे अन्तर रहता है- ४४८२०+ २$\frac{४८}{६१}$=४४८२२$\frac{४८}{६१}$ ॥ ४२ ॥ इसी प्रकारसे बाह्य मण्डल तक उसी गुणित (तृतीय मण्डलमें दुगुणा, चतुर्थमें तिगुणा इत्यादि) प्रक्षेपको मिलाते जानेसे विवक्षित मण्डलमें स्थित सूर्यका मेरुसे अन्तरप्रमाण होता है ॥ ४३ ॥ मध्यम मण्डलमें स्थित सूर्यके इस अन्तरका प्रमाण पैंतालीस हजार पचत्तर योजन मात्र होता है ४४८२०+(२$\frac{४८}{६१}$×९१$\frac{९}{२}$)=४५०७५ यो. ॥ ४४ ॥ बाह्य मण्डलमें मेरु और सूर्यका यह अन्तर पैंतालीस हजार तीन सौ तीस योजन मात्र होता है ४४८२०+(२$\frac{४८}{६१}$×१८३) = ४५३३० यो. ॥ ४५ ॥

विशेषार्थ — सूर्यका चार क्षेत्र १ लाख योजन विस्तृत जंबूद्वीपके भीतर १८० योजन मात्र है । इसे दुगुणा करनेपर दोनों ओरके चार क्षेत्रका प्रमाण ३६० योजन होता है । इसको जंबूद्वीपके विस्तारमेंसे कम कर देनेपर शेष अभ्यन्तर वीथीका विस्तार होता है- १००००० - ३६० = ९९६४० यो. । यही जंबूद्वीपस्थ उभय सूर्योंके बीच अन्तरका भी प्रमाण होता है । इसमेंसे मेरु पर्वतके विस्तारको कम करके शेषको आधा कर देनेसे उस अभ्यन्तर वीथीमें स्थित सूर्य और मेरुके बीच अन्तरका प्रमाण होता है- $\frac{९९६४०-१०००० }{२}$ ४४८२० यो. ।

जंबूद्वीपके अतिरिक्त सूर्यका चारक्षेत्र ३३०$\frac{४८}{६१}$ यो. मात्र लवण समुद्रमें भी है । इस प्रकार उसके समस्त चारक्षेत्रका प्रमाण १८०+३३०$\frac{४८}{६१}$ = ५१०$\frac{४८}{६१}$ यो. होता है । इतने चार क्षेत्रमें सूर्यकी १८४ वीथियां है। इनमेंसे वह क्रमशः प्रतिदिन एक एक वीथीमें संचार करता है।

नवनवतिसहस्राणि षट्छतानि भवन्ति च । चत्वारिंशच्च मध्यं स्यादन्तरमण्डलसूर्ययोः ॥ ४६
पञ्चत्रिंशत्पुनर्भागा योजनानां च पञ्चकम् । एकैकस्मिन् भवेत् क्षेपस्तस्यानन्तरमण्डले ॥ ४७
५ । $\frac{३५}{६१}$ ।
नियुतं शतमेकं च पञ्चशान्मध्यमान्तरम् । षष्ठ्या युक्तैः शतैः षड्भिर्नियुतं बाह्यमण्डले ॥ ४८
आसन्नमण्डलस्यास्य परिधेश्च प्रमाणकम् । नवाष्टशून्यपञ्चैकं त्रयमङ्कक्रमेण च ॥ ४९
मण्डले मण्डले क्षेपः परिधौ दश सप्त च । अष्टत्रिंशच्च भागा स्युरेकषष्ठ्यास्तु साधिकाः ॥ ५०
१७ । $\frac{३८}{६१}$ ।
नियुतानां त्रिकं भूयः सहस्रं षोडशाहतं । शतानि सप्त द्वे चैव परिधिर्मध्यमण्डले ॥ ५१
अष्टादशसहस्राणि नियुतानामपि त्रिकम् । त्रिशतं दश चत्वारि परिधिर्बाह्यमण्डले ॥ ५२

अब यदि इस समस्त चारक्षेत्रमेंसे उपर्युक्त १८४ वीथियोंके विस्तारको कम करके शेषमें एक कम वीथियोंके प्रमाणका भाग दें तो उन सब वीथियोंके बीच निम्न अन्तरका प्रमाण प्राप्त होता है– समस्त चारक्षेत्र ५१०$\frac{४८}{६१}$ = $\frac{३११५८}{६१}$; समस्त वीथियोंका विस्तार $\frac{४८}{६१}$ × १८४ = $\frac{८८३२}{६१}$; $\frac{३११५८}{६१} - \frac{८८३२}{६१} \div (१८४-१)$ = २ यो. । इसमें सूर्यबिम्बके विस्तारको मिला देनेसे सूर्यके प्रतिदिनके गमनक्षेत्रका प्रमाण प्राप्त हो जाता है — २+$\frac{४८}{६१}$ = २$\frac{४८}{६१}$ यो. । इस दैवसिक गमनक्षेत्रके प्रमाणको अभ्यन्तर (प्रथम) वीथीमें स्थित सूर्य और मेरु पर्वतके बीच रहनेवाले उपर्युक्त अन्तर प्रमाणमें मिला देनेसे द्वितीय वीथीमें स्थित सूर्य और मेरुके बीच अन्तरका प्रमाण होता है – ४४८२० + २$\frac{४८}{६१}$ = ४४८२२$\frac{४८}{६१}$ यो. । इस प्रकार मेरु और सूर्यके बीच पूर्व पूर्वके अन्तर प्रमाणमें उत्तरोत्तर इस दैवसिक गमनक्षेत्रके प्रमाणको मिलाते जानेसे तृतीय व चतुर्थ आदि आगेकी वीथियोंमें स्थित सूर्य और मेरुके बीचके अन्तरका प्रमाण जाना जाता है ।

अभ्यन्तर वीथीमें स्थित दोनों सूर्योंके मध्यमें निन्यानबै हजार छह सौ चालीस (९९६४०) योजन मात्र अन्तर होता है ॥ ४६ ॥ अभ्यन्तर वीथीमें स्थित दोनों सूर्योंके मध्यगत इस अन्तरप्रमाणमें उत्तरोत्तर पांच योजन और एक योजनके इकसठ भागोंमेंसे पैंतीस भागों (दुगुणा दिवसगतिक्षेत्र–२$\frac{४८}{६१}$ × २ = ५$\frac{३५}{६१}$)को मिलानेसे द्वितीयादि अनन्तर वीथियोंमें स्थित दोनों सूर्योंके मध्यगत अन्तरका प्रमाण होता है ॥४७॥ दोनों सूर्योंका अन्तर मध्यम वीथीमें एक लाख एक सौ पचास योजन तथा वही बाह्य वीथीमें एक लाख छह सौ साठ योजन मात्र होता है – ९९६४० + (५$\frac{३५}{६१}$ × $\frac{१८३}{६१}$) = १००१५० यो. मध्यम अन्तर; ९९६४० + (५$\frac{३५}{६१}$ × १८३) = १००६६० यो. बाह्य वीथीगत दोनों सूर्योंका अन्तर ॥ ४८ ॥

इस अभ्यन्तर वीथीकी परिधिका प्रमाण अंकक्रमसे नौ, आठ, शून्य, पांच, एक और तीन (३१५०८९); इतने योजन मात्र है ॥ ४९ ॥ आगे आगेकी (द्वितीय-तृतीयादि) वीथियोंके परिधिप्रमाणको लानेके लिये पूर्व पूर्व वीथीके परिधिप्रमाणमें दस और सात अर्थात् सत्तरह योजन तथा एक योजनके इकसठ भागोंमेंसे अड़तीस भागों (१७$\frac{३८}{६१}$)को क्रमशः मिलाते जाना चाहिये ॥ ५० ॥ मध्य वीथीमें परिधिका प्रमाण तीन लाख सोलह हजार सात सौ दो योजन मात्र है — ३१५०८९ + (१७$\frac{३८}{६१}$ × $\frac{१८३}{६१}$) = ३१६७०२ यो. ॥ ५१ ॥ बाह्य वीथीमें इस परिधिका प्रमाण तीन लाख अठारह हजार तीन सौ चौदह योजन मात्र है — ३१५०८९ +

बाह्यादेकैकमार्गस्य परिधिश्चान्तरं पुनः । स्वस्वक्षेपेण हीनं स्याद्यावत्प्रथममण्डलम् ॥ ५३
चत्वारिंशच्च चत्वारि सहस्राणि शताष्टकम् । विंशतिश्चान्तरं मेरोश्चन्द्रस्यासन्नमण्डले ॥ ५४
षट्त्रिंशद्योजनं तस्मिन् उत्तरं सप्तविंशतिः । चतुःशतस्य भागाश्च नवसप्ततिशतं भवेत् ॥ ५५
उत्तरेण सहैतेन तदनन्तरमन्तरम् । पुनस्तेनैव संयुक्तं तृतीयं त्वन्तरं भवेत् ॥ ५६
चत्वारिंशच्च पञ्चापि सहस्राण्यथ सप्ततिः । पञ्चाधिका च देशोना मेर्विन्दोर्मध्यमान्तरम् ॥ ५७
। ४५०७५ । ऊनप्रमाणं $\frac{४}{६}$ ।
चत्वारिंशत्पुनः पञ्च सहस्राणि शतत्रयम् । देशोना चान्तरं त्रिंशन्मेर्विन्दोर्बाह्यमण्डले ॥ ५८
। ४५३३० । ऊनप्रमाणं $\frac{८}{६}$ ।

$(१७\frac{३६}{६१}\times१८३)=३१८३१४$ यो. ॥ ५२ ॥ बाह्य वीथीसे लेकर प्रथम वीथी तक प्रत्येक वीथीका यह परिधिप्रमाण और अन्तर उत्तरोत्तर अपने अपने प्रक्षेपसे कम है ॥ ५३ ॥

मेरु पर्वतसे प्रथम वीथीमें स्थित चन्द्रका अन्तर चवालीस हजार आठ सौ बीस ४४८२० योजन मात्र है ॥ ५४ ॥ द्वितीय आदि वीथियोंमें स्थित चन्द्रके उपर्युक्त अन्तरको लानेके लिये यहां चयका प्रमाण छत्तीस योजन और एक योजनके चार सौ सत्ताईस भागोंमेंसे एक सौ उन्यासी भाग $(३६\frac{१७९}{४२७})$ मात्र है ॥ ५५ ॥ मेरुसे प्रथम वीथीमें स्थित चन्द्रके पूर्वोक्त अन्तरप्रमाणमें इस चयके मिला देनेसे अनन्तर (द्वितीय) वीथीमें स्थित चन्द्र और मेरुके बीचके अन्तरका प्रमाण प्राप्त होता है । फिर इस अन्तरप्रमाणमें उसी चयको मिला देनेसे तृतीय अन्तरका प्रमाण होता है ॥ ५६ ॥

विशेषार्थ— सूर्यके समान चन्द्रमाका भी चारक्षेत्र $५१०\frac{४८}{६१}=\frac{३१११५८}{६१}$ योजन प्रमाण ही है (देखिये पीछे श्लोक ४५का विशेषार्थ) । इसमें चन्द्रवीथियां १५ हैं। इनमेंसे वह प्रतिदिन क्रमशः एक एक वीथीमें संचार करता है। इस चारक्षेत्रमेंसे उक्त १५ वीथियोंके समस्त विस्तारको कम करके शेषमें एक कम वीथियोंकी संख्याका भाग देनेपर उनके बीचके अन्तरका प्रमाण प्राप्त होता है– समस्त चारक्षेत्र $५१०\frac{४८}{६१}=\frac{३१११५८}{६१}$; समस्त वीथियोंका विस्तार $\frac{५६}{६१}\times१५=\frac{८४०}{६१}$; $\frac{३१११५८}{६१}-\frac{८४०}{६१}\div(१५-१)=३५\frac{२१४}{४२७}$ यो. । इसमें चन्द्रबिम्बके विस्तारको मिला देनेसे चन्द्रके प्रतिदिनके गमनक्षेत्रका प्रमाण होता है– $३५\frac{२१४}{४२७}+\frac{५६}{६१}=३६\frac{१७९}{४२७}$ यो. ।

सूर्यके समान चन्द्रकी भी अभ्यन्तर वीथीका विस्तार ९९४४० योजन तथा उसमें स्थित चन्द्र और मेरुके मध्यगत अन्तरका प्रमाण ४४८२० योजन है । इस अन्तरप्रमाणमें प्रतिदिनके गमनक्षेत्रको मिला देनेसे द्वितीय वीथीमें स्थित चन्द्र और मेरुके मध्यगत अन्तरका प्रमाण होता है । $४४८२०+३६\frac{१७९}{४२७}=४४८५६\frac{१७९}{४२७}$ यो. । इस प्रकार पूर्व पूर्वके अन्तर-प्रमाणमें उत्तरोत्तर चन्द्रकी प्रतिदिनकी उपर्युक्त गतिके प्रमाणको मिलाते जानेसे तृतीय एवं चतुर्थ आदि आगेकी वीथियोंमें स्थित चन्द्र और मेरुके मध्यगत अन्तरका प्रमाण प्राप्त होता है ।

मेरु और चन्द्रके मध्यम अन्तरका प्रमाण पैंतालीस हजार पचत्तर योजनसे किंचित् $\frac{४}{६}$ कम है— $४४८२०+(३६\frac{१७९}{४२७}\times१\frac{४}{६})=४५०७४\frac{५७}{६१}$ यो. ॥ ५७ ॥ बाह्य (१५वीं) वीथीमें स्थित चन्द्र और मेरुके मध्यगत अन्तरका प्रमाण पैंतालीस हजार तीन सौ तीस योजनसे किंचित् $(\frac{८}{६})$ कम है— $४४८२०+(३६\frac{१७९}{४२७}\times१४)=४५३२९\frac{५३}{६१}$ यो. ॥५८॥

अन्तरं रविमेर्वोर्यत्तद्विन्दोर्मध्यबाह्यजम् । विशेषस्त्वेकषष्ठ्यंशाश्चत्वारोऽष्टौ च हीनकाः ॥ ५९
। $\frac{४}{६१}$ । $\frac{८}{६१}$ ।

पूर्वोक्ते तूत्तरे हीने चोपान्त्यान्तरमिष्यते । तेनैव रहितं भूयस्तृतीयं बाहिरा.द्भवेत् ॥ ६०
नवतिश्च नवापि स्युः सहस्राण्यथ षट्छतम् । चत्वारिंशच्च शशिनोरन्तरं पूर्वमण्डले ॥ ६१
अत्रोत्तरं च विज्ञेयं योजनानां द्विसप्ततिः । सप्तद्विकचतुष्काणामष्टौ पञ्चत्रयोंऽशकाः ॥ ६२
। $\frac{३५८}{४२७}$ ।
उत्तरेण सहानेन तदनन्तरमन्तरम् । तेनैव सहितं भूयस्तृतीयं चान्तरं भवेत् ॥ ६३
मध्यमान्त्यान्तरे चेन्द्वोः सूर्ययोरिव भाषिते । एकषष्ठ्यंशकैर्न्यूने अष्टाभिर्हृच्चष्टकैरपि ॥ ६४
। $\frac{८}{६१}$ । $\frac{१६}{६१}$ ।

मेरुसे सूर्यका जो मध्यम और बाह्य अन्तर है वही मेरुसे चन्द्रका भी मध्यम और बाह्य अन्तर है। विशेष इतना है कि सूर्य और मेरुके मध्यगत अन्तरकी अपेक्षा चन्द्र और मेरुके मध्यगत मध्यम अन्तर इकसठ भागोंमेसे चार भागों($\frac{४}{६१}$)से हीन है तथा बाह्य अन्तर आठ भागों ($\frac{८}{६१}$) से हीन है (देखिये पीछे श्लोक ४४-४५) ॥ ५९ ॥

